व्याभरणस्त्रगंवरैः अहिंसकं सख्यमुपेत्य साग्निकं प्रणम्य तं ब्रह्मसुतं गृहं ययौ १८ पुलस्त्येनापि
संत्यक्तो रावणः स प्रतापवान् परिष्वक्तः कृतातिथ्यो लज्जमानो विनिर्जितः पितामहसुतश्चा
पि पुलस्त्यो मुनिपुंगवः मोचयित्वा दशग्रीवं ब्रह्मलोकं जगाम ह २० एवं स रावणः प्राप्तः कार्त
वीर्यात्प्रधर्षणं पुलस्त्यवचनाच्चापि पुनर्मुक्तो महाबलः २१ एवं बलिभ्यो बलितः संति राघवनं

अग्निसाक्षिकं तत्सहितं पुलस्त्येनापि संयुक्तः गच्छतं कामित्यनुज्ञातः अपितस्य व यथातिथ्यः अर्जुनेनीति शेषः बलिभ्योपि बलिनामं १८
निरस्य स्वीविविज्ञानादिनाशयः श्रेयस्तेनैव परिस्मिन वत्तायनकार्या २२

156 इत्यार्षे उत्तरकाण्डे त्रयस्त्रिंशः ३३ शृणु सम रावणस्य वालिदर्शनं श्रुतिर्विस्मयः कृतः । पुलस्त्येन निर्मोचितार्जुनसकाशात् प्रापितेन प्रजयिता विसर्जितः
वानरभवनं निर्वेदरहितः कृतः तस्यार्थः १ युद्धेद्ध्यति युद्धानिमित्तमाह्वयति स्मार्थः २ वानरामात्याः वालिसचिवाः तानाहता
एकस्तावा पितास्ते वानरभ्यवराजः सुग्रीवश्चोवाच ४ किमर्थं त्वमिदानीमाहूतवानसि इति तेनाभ्युक्तो वालिवासोऽहं दाता मम नितिशेषः ५ ततस्त्वं

इत्यार्षे रामायणे उत्तरकाण्डे त्रिंशः ३३ अर्जुनेन विमुक्तस्तु रावणो राक्षसाधिपः चचार पृथिवीं स
र्वामनिर्विण्णस्तथाकृतः १ राक्षसं वा मनुष्यं वा शृणुते यं बलाधिकं रावणस्तं समासाद्य युद्धे ह्वयति
दर्पितः २ ततः कदाचित् किष्किन्धां नगरीं वालिपालितां गत्वाह्वयति युद्धाय वालिनं हेममालिनं ३ ततस्तु वान
रामात्यास्तारस्तारापिता प्रभुः उवाच वानरो वाक्यं युद्धप्रेप्सुमुपागतं ४ राक्षसेन्द्र गतो वाली यस्ते प्र
तिबलो भवेत् कोऽन्यः प्रमुखतः स्थाता तव पापकः प्लवंगमः ५ चतुर्भ्योऽपि समुद्रेभ्यः संध्यामन्वा
स्य रावण इदं मुहूर्तमायाति वाली तिष्ठ मुहूर्तकं ६ एतानस्थिचयान् पश्य ये तु शंखवन् पाण्डराः यु
द्धार्थिनामिमे राजन् वानराधिपतेजसा ७ यद्वामृतरसः पीतस्त्वया रावण राक्षस तदा वालिनमा
समुद्रेभ्यः चतुर्भ्यः समुद्रेभ्यः संध्यां समयकर्तव्यं देवतां वन्द्य सादयतदेतेन वा जीवितं ८ पश्येदानीं जगद्विश्रममिदं विश्व
रूपाः मत्वा समस्याध्यानात् इदं मुहूर्तं शुभं सत्त्विन्मुहूर्ते आयाति ९ तेनते युद्धतया ग्रामिमिताहर्पतानीति ७ यद्वेति यद्यपि च यद्यपि स्तन र सः
पीतो भवति तदापि तथापि वालिनमासाद्य न तव जीवितं तदनं तत्समीपगाम न पर्यन्ते ८ जगद्विजिं सर्वो ग्रब्धभूतरसं वालिने पराजितं भेते भ

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

157 तावंतारादीतिर्थ्यः॥ संध्योपासनतत्परं संध्याकार्यं यद्ब्रह्मध्यानं तत्परं॥ निःशब्दः यदंतिः शब्दः पदविक्षेपो यस्मिन् क्रिया यातया॥ पापा-
भिप्रायकं तं सिंहो वा सिंह इव॥ जिघृक्षमाणमित्यादि रिमेवमिति संतो वालिनो विचारः॥ द्रक्ष्यंति देवादयः इति शेषः ममांकस्थं क-
क्षस्थमित्यर्थः। स्रस्तं स्रस्तमानातिकुरुकारांबरं स्रंवस्तंवयसानंगरुडस्येति ग्रंकस्थमित्यनुकर्षः। नैगमान्वैदिकान्वा अस्यादयो हि स्वय-

सततार्ववितिर्भर्त्सयामास वणो लोकरावणः। पुष्पकं तत्समारुह्य प्रययौ दक्षिणार्णवं॥ तत्र हेमगि-
रिप्रख्यं तरुणार्कनिभाननं। रावणो वालिनं दृष्ट्वा संध्योपासनतत्परं॥ पुष्पकादवरुह्याथ राव-
णोंजनसंनिभः। ग्रहीतुं वालिनं तूर्णं निःशब्दपदमव्रजत्॥ यदृच्छया तदा दृष्टो वालिनापि स
रावणः। पापाभिप्रायकं दृष्ट्वा चकार न तु संभ्रमं॥ शशमालक्ष्य सिंहो वा पन्नगं गरुडो यथा
न चिंतयति तं वाली रावणं पापनिश्चयं॥ जिघृक्षमाणमाद्यैनं रावणं पापचेतसं। कक्षावलं-
विनं कृत्वा गमिष्यामि त्रीन्महार्णवान्॥ द्रक्ष्यंत्यरिं ममांकस्थं स्रस्तोरुकरांबरं। लंबमानं दशग्रीवं
गरुडस्येव पन्नगं॥ इत्येवं मतिमास्थाय वाली मौनमुपास्थितः। जपन्वै नैगमान्मंत्रांस्तस्थौ पर्वतराडिव॥
तावन्योन्यं जिघृक्षंतौ हरिराक्षसपार्थिवौ। प्रयत्नवंतौ तत्कर्म ईहतुर्बलदर्पितौ॥ हस्त-

प्रतिभातसकलवेदाः जयन् दृष्ट्वा अध्यायन्॥ तत्कर्म ग्रहणकर्म॥ हस्तग्राहं हस्तेन ग्रहणमभिप्रायं वनयथा दशग्रीवेन मन्त्रासु क्रमेण पादाश-
ग्रेन यस्मादायान्तस्तानामपरान्स्तुतिर्वा पिनर्हि गवलोकनं नरहितेनापि हस्तग्राह्यामिति यद्रावणा यादशग्रीवेन ता हशमेनेत्यर्थः। सुरस्त्वोनरुडः॥ ७४

158 मुमोत्वयिष्यवहतिमोत्तशह्यातनक्रोतिर्यपितानरवमाणाःक्रोशेत। २२ अशक्रंवंतरतिपरं २५ यतःपर्वतंद्राग्रपिकालिमार्गस्याक्रमतस्मो
मक्षाणीतिविभ्रजीवनप्रष्प्तः प्राणितस्यमार्गोवक्रामतीतिकिंवक्तव्ये २९ अपक्षिगणसंपातानयावताकालेनकलीगच्छतींताकालेनप
त्तिगतोयणप्राप्यास्सागरान्क्रमशोगच्छतितिशेषः संध्याकालेसभाः संध्याकालेध्येयदेवताचपेवक्ष्मवदततष्मातवान् २८ मतावणाः
कत्वस्थरावणासहितः २९ तस्मिन्संध्यामुपासित्वास्नात्वेत्यादिदक्षिणसमुद्रतटेपिजटेपिजयदेवरामान्मोचानिस्कृतः समुद्रवत

गृहीतकामंतेग्रहत्यत्वसौमीश्चांहविः त्वमपातवेगेनक्रतावकतावलेविते ११ तंवपीड्यमाने
तविततंनविमंडः जहारावणावालीपवनस्तोयदंयथा १२ अथतेरात्तसामामपाह्रियमाणादशा
ननं ममोत्वयिषवोवालिरवमाणाअभिद्रुताः अन्वीयमानस्तैवालीभ्राजतेवरमध्यगः अन्वीय
मानोमेघौघैरंवरस्थइवांशुमान् १४ तेशक्नुवंतःसंप्राप्तंवालिनंराक्षसोत्तमः तस्यवाहूरुवेगेनप
रिश्रांताव्यवस्थिताः वालिमार्गादपाक्रमन्पर्वतेन्द्रापिगच्छतः किंपुनर्जीवितप्राप्त्याविहंगमोत्तम
प्राणिनः १९ अपक्षिगणसंपातान्वानरेंद्रोमहाजवः क्रमशःसागरान्सर्वान्संध्याकालमवंदत १८ सं
पूज्यमानोयातस्तुसचरैःखचरोत्तमः पश्चिमंसागरंवालीआजगामसरावणः स्मिन्संध्यामुपासि

त्वापिशतःसंध्याकालस्यउपास्यंदेयंतत्रमिलित्वातिस्मइतात्मकस्यमध्येचतः समुद्रतस्यवक्षेदेनकिंचिःपुत्रदारान्नतिष्ठतिइतिवाप्यं
यत्नतस्यदक्षिणस्यसमुद्रशैच्चपश्चिमस्तानमनतरेअपोहिष्टादिमंत्रैर्मार्जनंपूर्वसमुद्रेप्रदीसवंसंध्यावंदनशेषानुष्ठानंत्वानंचततःसंध्याम
त्वास्तत्विकिरितिकतकतोयादयस्तजयवेगमान्मयज्ञानितिदक्षिणसमुद्रस्यानकरोक्ताविहस्यतेमुद्रक्तेरीत्यासाचसंध्याकालेगायत्र्यर्थ

159 वासववासयं वासवि: ३२ प्रहसन्निति मां नित्यं दृष्ट्वा रामास्वयमेव प्रग्रहवं प्रामहरति नो षाम्प्रहारस्तु ३४ प्रासादितः कदिति देवं प्रापितः ३०

ओं
रा॰ उ॰
टी॰
८॰

वाङ्मयेनानसाहसंवञ्जमानोमहाहरि वायुवन्नमनोवन्नजगामसहपाञ्जुगाः ३० उत्तरेसागरेसंध्या
मुपासित्वादशाननं वहमानोगमहाशाली पूर्ववेसमहोदधिं ३१ नवापिसंध्यामन्वास्यवानरःसहसे
श्वरः किष्किंधामभितोगृह्यरावणाइनरागमत् ३२ वनखोपसमद्देशसंध्यामन्वास्यवानरः रामि
तिवा—वावप्रहसन्रावणमुद्रः ३३ विस्मयंतमुमोचाथस्वकक्षात्कपिसत्तमः कुतस्त्वमित
मिदंवचनमब्रवीत् ३४ वानरेंद्रमहेंद्राभंराक्षसेंद्रोसितावणः गृहीत्वैरहंसंप्रामःसवाद्यासादित
स्त्वया ३५ अहोबलमहोवीर्यमहोगांभीर्यमेवच येनाहंपशुवद्गृह्य भ्रामितश्चतुरोर्णवां ३६ एव
मश्रांतःवीरःशीघ्रमेववानरः मांचैवोद्वहमानस्तुकोन्योवीरभविष्यति ३७ त्रयाणामेव
भूतानांगतिरेषास्लवगम मनोनिलसुपर्णानांनात्रवा—प्रसंशयः ३९ सोहंदृष्टबलस्तुभ्यमि
च्छामिहरिपुंगवः त्वयासहचिरंसख्यंसुस्निग्धंपावकाग्रतः ४० दाराःपुत्राःपुरंराष्ट्रंभोगाच्छादनभो
जनं सर्वमेवाविभक्तंनोभविष्यतिहरीश्वरः ४१ ततःप्रज्वालयित्वाग्निंतावुभौहरिराक्षसौ भ्रा

भ्रात्रत्वनतप्रप्तातः सन्नोपवितसमानभावे १८३९ नम्पतव ४० नेप्राव्रयोः ४१

८॰

160 मागतेःसंहेतिशेषः ४४ धर्षितःवालिनारावणः यथापावकनिकटेभ्राताकृतःसौहृदंभावतयास्नेहःकृतः ४५ इत्यार्षेउत्तरकांडेचतुस्त्रिंश :३४
अथरावणाद्वालिनस्तयापिहनूमतोबलवत्त्वंमन्यमानेनरामेणमहाबलोहनूमान्सुग्रीवालिनंतदहतवानितिसंशयेनुत्तरमाहपृष्टश्चेतितदक्षिणा
शारक्षिणास्त्रिकप्रष्टश्चेतस्यस्यविवरणमिदमाहेति १ अतुलमनुपमंपताभ्यांपतयोःएतस्यार्थेचतुर्थीआर्षीपत्नयोर्बलेहनूमतातद्
भुजेनान्यस्यबलंवितर्कसौततसैन्नाहरिराक्षसौ किष्किंधांविशतस्तुहृष्टौसिंहौगिरिगुहामिव ४८ सततप्रमा
समप्रहितःसुग्रीवस्तुरावणः अमर्षेसेनागतेनीतस्त्रैलोक्योत्सादनार्थिभिः एवमेतस्यराघवंते
वालिनोभवदुत्तमं सौत्रानारावणात्कृतः धर्षितश्चकृतश्चाग्निसंधानापावकसंनिधौ ४५ बल
मप्रतिमंरामवालिनोभवदुत्तमं संयितापापविनिर्दग्धःशलभोवह्निनायथा ४८ इत्यार्षेउत्त
रकांडेचतुस्त्रिंशः ३४ अपृच्छततदारामोदक्षिणाशाश्रयंमुनिं प्रांजलिर्विनयोपेतश्चेदमाहव
चोर्थवत् १ अतुलंबलमेतद्वैवालिनोरावणस्यच नत्वेताभ्यांहनुमतासमंत्वितिमतिर्मम शौ
र्यंदाक्ष्यंबलंधैर्यंप्राज्ञतानयसाधनं विक्रमश्चप्रभावश्चहनूमतिकृतालयाः २ दृष्टैवसागरंवी
क्ष्यसीदंतींकपिवाहिनीं समाश्वास्यमहाबाहोयोजनानांशतंप्लुतः ४
लेनसमभित्यर्थः २ नकेवलबलमेवाधिकंकिंतुविद्दीत्याहशौर्यमितिदाक्ष्यंविप्रकारेनबलंशरीरंधर्षकनाष्प्रकंपताप्राज्ञताशी
घ्रकार्याकार्यनिर्णयःरतानयसाधनंराजनीतिक्रमत्र्यादनेरतानेव्रजणानाहृष्टेवेतिसागरंवीक्ष्यसीदंतींकपिवाहिनींदृष्टानोसमा

161 वंधानब्रह्मास्त्रवंधानज्ञानिकर्मणिहनूमतोदृष्टानिकालस्यमस्यैद्वादेश्मनस्यते ८ लंकाग्रामाविभीषणायदेयत्तेनप्रतिमर्थः ल
उ॰ क्ष्मणप्रशान्तिरोषपर्यन्तानयेन ९ तस्यानमहायश्रतिशेषः १० वीरुपशतिकारोतोहत्वावाचीकिमर्थंवालिवातेनेतिपाठस्सुग्रीवप्रि
रा॰
टी॰ धर्षयित्वापुरींलंकांरावणांतःपुरंतदा दृष्टासंभाषितावापिसीताह्याश्वासितातथा ७ सेनाग्रगामंत्रि
८१ सुताःकिंकरारावणात्मजः एतेहनुमतातत्रएकेनविनिपातितः ८ भूयोवंधाद्विमुक्तेनभाष
यित्वादशाननः लंकाभस्मीकृतायेनपावकेनेवमेदिनीं नकालस्यनशक्रस्यनविष्णोर्वित्तप
स्यच कर्माणितानिश्रूयंतेयानियुद्धेहनूमतः एतस्यवाहुवीर्येणलंकासीताचलक्ष्मणः प्राप्तामया
यानयश्चैवराज्यंमित्राणिवांधव हनूमान्यदिमेतस्मान्नाभवद्वानराधिपतेःसखा प्रवृत्तिमपिकोवेत्तुं
जानक्याःशक्तिमान्भवेत् १० किमर्थंवालिनश्चैतनसुग्रीवप्रियकाम्यया तदावैरेसमुत्पन्नेनदग्धो
वीरुधोयथा नहिवेदितवान्मन्येहनूमानात्मनोवलं यद्दृष्टवान्जीवितेष्टंक्लिश्यंतंवानराधि
पं एतन्मेभगवन्सर्वंहनूमतिमहात्मने विस्तरेणयथातत्वंकथयामरपूजित ११ राघवस्य----

यकाम्ययावालिघातेकिमर्थंनप्रवृत्तमर्थः पदच्छेदशेषपूर्णाभ्यांदृढतासैवसेवविवज्ञेतदावैरउत्पद्यौलसहनहोऽत्वंस्वयमेवरामकृ
तेतिनदहीतिनेवीवितेसाजीवितादपिप्रियपदं १२ हनूमपितेषदृष्टमेमतंसर्वंकथयस्वतः ८१

162 यद्बुद्धीर्वीतिस्यात्मनोबलंनजानातीत्येतत्तत्त्वलस्तिव १५ तद्देवाहमामोचेति १६ वाल्यतयावाल्यभावेनप्रज्ञानतेवेस्यर्थः प्रत्नेनोसते १७ नि
शामयस्तारासूर्यस्तवेरणास्वर्णः रूपामेरुः सावर्णमेरुः १९ परिस्रुतापरसिद्धा २० पालिम्पकतिभाभासप्राप्यग्रसनानवर्णाशस्तुतासुत

सत्यमेनतदृष्टपश्चद्धवीर्यविहन्मति नवलेविद्यतेतस्यारणणानोनमतोपरः १५ प्रमोत्तपार्थेशायस्वाद
तोस्यमुनिभिःप्रवाः ववेताद्विवलंसवेवलीसत्तविमर्दन १६ वाल्येनेतनयत्कर्मेहक्तरामममहावल
तत्रवेणीयितेशकास्मितिवाल्यतयासयते १७ यदिवास्यत्वभिप्रायःसंप्रोतेतववराचव समाधायमतिं
रामनिशामयवदाम्यहं १८ सर्वदानवरःस्वर्णःसमेरुर्नामपर्वतः यत्रराज्यंप्रशास्तिस्मकेसरीनाम
वैपिता १९ तस्यभार्यावभूवेष्टाअंजनेतिपरिश्रुता जनयामासतस्यांवैवायुरात्मजमुत्तमं २० पा
लिम्पकतिभाभासंप्रसूतेसंतदांजना फलान्याहर्तुकामावैनिष्क्रांतागहनेवरा २१ एषामातुर्वियोगा
त्तुतयावभृशार्दितः रुरोदशिशुरत्यर्थंशिशुःशरवणेयथा २२ ततोयत्रविवस्वंतंजपापुष्पोत्करोप
म दृष्ट्वाफललोभाच्चउत्पपातरविंप्रति २३ वालार्काभिमुखोवालोवालार्कइवमूर्तिमान् ग्रही
तुकामोवालार्कंप्लवतेवरमध्यगः एतस्मिन्प्लवमानेतशिशुभावेहनूमति देवदानवयक्षाणां

वती २१ शरवणेशस्तुकुमारस्वामीत्यर्थः शिशुभावेमास्तोवस्यायाहनूपतिस्रवमानेसति २३ विस्मयःसोमहानभूत् २४ ना

ॐ· रामा· टी· ८२

163 दोषज्ञो विद्वान्न भवतीत्यदोषज्ञस्तत्र हेतुः शिशुरिति २० सूर्यरथोपरि तन्न प्रदेशे यो ग्रनेन हनूमता परास्पृष्टः स्पृष्टो राजन्न सोमेंद्रस्ताम्रस्तः
स्तन्नयक्रांतः २२ हेवासवचंद्रार्कौ मम यथाकाले शुभत्तापनेयं शुभदोपनीयमिति नेनेति त्रुममामेदं तातदत्ते २४ संगाधारिणानाम्नगार
नगन्नुसवते वायुः स्वंतेषु ज्रमात्मनः सूर्यदाहभयाद्देस्ततुषारन्नुयथशीतलः २८ वज्रयोजनसाहस्त्रं
क्रामन्त्रेवगावोवरः पितुर्वस्याद्व---भास्कराभ्यासमागतः २९ शिशुरेषत्वदोषज्ञ इति मत्वा दिवाकरः
कार्यं चास्मिन्समायत्तमित्येवं न ददाह सः ३० यमेव दिवसं ह्येष ग्रहीतुं भास्करं प्लुतः तमेव दिवसं राहु
र्जिघृक्षति दिवाकरं ३१ अनेन च परामृष्टो राहुः सूर्यरथोपरि अपक्रांतस्ततस्त्रस्तो राहुश्चन्द्रार्कमर्दनः ३२
इंद्रस्य भवनं गत्वा सरोषः सिंहिकासुतः अब्रवीद्भ्रुकुटीं कृत्वा देवं देवगणैर्वृतं बुभुक्षापनयं दत्वा
चंद्रार्कौ मम वासव किमिदं तत्त्वया दत्तमन्यस्य बलवृत्रहन् अद्याहं पर्वकाले तु जिघृक्षुः सूर्यमागतः
तः अथान्यो राहुरासाद्य जग्राह सहसा रविं स राहोर्वचनं श्रुत्वा वासवः संभ्रमान्वितः उत्पपातासनं
हित्वा उद्वहन्कांचनीं स्रजं ततः कैलासकूटाभं चतुर्दंतं मदस्रवं शृंगारधारिणं प्रांशुं स्वर्णघंटा
ट्टहासिनं ३४ इंद्रः करीन्द्रमारुह्य राहुं कृत्वा पुरःसरं प्रायाद्यत्राभवत्सूर्यः सहानेन हनूमता ३५
धारिणं स्वर्णघंटाप्रहृतरणद्धासवंतं ३५ करीन्द्रं ऐरावतं अथातिरभसेनागाद्राहुरुत्सृज्य वासवं अनेन च स वै दृष्टः
अनेन हनूमता स हृदयदेशे सूर्यस्तंभ्रायात् ३६ अतिरभसेनातिवेगेनागात् वादपि पूर्वमिति शेषः अनेन हनूमता राहुः ३७ ८२

164 एकएवेदमहाशैलह्रदवह्नदत्तरमेवाक्मुखपोषइतिराहोसहन्नएकथ्यतं ॥५०॥ प्रयोवालिदितिंसर्वराऊदर्शनात्सर्वमेवायंराज्ञोःस्वरक्षितिः
क्षितः ॥५२॥ इदमपिमहात्फलमितिमत्वाहस्तिराजानपेरोपते ॥५३॥ हस्तानतातहस्तायान् ॥५४॥ वासमाहनुहतःशहस्तियान्पपाराहवुरि
ततःसूर्यसमुत्सज्यपाङ्गफलमवेदयच उत्पपातप्रनन्योमगृहीतंसिंहिकासुतं ॥५५॥ उत्सृजार्कसिंसं
हाममपृथावेगवंगामे प्रवेदेवंपराहूतोमामवपोषःपराङ्मुखः ॥५६॥ इदमाघोसमानस्तमानारसिंहि
कासुतः इदंइदंतिसेत्रासान्मड॒ रभाषत ॥५७॥ राहोर्विक्रोशमानस्यप्रागेवालक्षितेसर्वं एकवेद्राव
वमाभैषीरदमेतंतिषदये ॥५८॥ ऐरावतंततोदृष्टामहतदिदमित्यपि फलंतेहस्तिराजानमभिदुद्राव
मारुतः ॥५९॥ तथाप्यधावेतोनृपेममवतन्जिघृत्वा मुहूर्तमवहोर सिंहाद्युपरिभासर्वं ॥६०॥ एवमा
धावमानंतवनातिक्रुद्धःशचीपतिः हस्तानादतिमकेनमूलिपेनाभ्यताडयत् तस्मिंस्तयतितेवा
पिवज्रताडनविह्वलं त्रुक्रोधेंद्रायपवनःप्रजानामहितायसः ॥६१॥ प्रचारसंततमेघटस्यप्रजासु
तःशानःप्रभुः गुहांप्रविष्टासवसुतंशिशुमादायमारुतः ॥६२॥ विएमत्रावाघमावृतप्रजानोपरमा
निकोपात् ॥६३॥ प्रचारंदेहिसान्त्रहितभूतसचारंसमरहीसंदिष्यशुंतर्गतःप्रभुःसर्वजनस्तहितितिहृतिकर्मी ॥६४॥ रुरोधनिरुद्धस्वगते
प्रचारमकरोत् एवंविधार्थसदेवशकानेदृष्टोनाथयथैतिवासवोयथावर्षाएपाक्रमस्तहये ॥६५॥

श्री
रा॰
टी॰
८२

165 स्वाध्यायो वेदाध्ययनं वषट्कारो यागः निष्क्रियं संचाररहितं निरयस्थमिव दुःखितं प्राणिनः इत्यर्थः ५२ सहोदरेति महोदरं इत्येषा वे

वायुप्रकोपाद्भूतानि निरुच्छ्वासानि सर्वतः संधिभिर्भिद्यमानैश्च काष्ठभूतानि जज्ञिरे ५१ निःस्वाध्याये

वषट्कारं निष्क्रियं धर्मवर्जितः वायुप्रकोपात्त्रैलोक्यं निरयस्थमिवाभवत् ५२ ततः प्रजाः सगन्धर्वाः

सदेवासुरमानुषाः प्रजापतिं समाधावन् दुःखिताः सुखमिच्छया ५३ ऊचुः प्राञ्जलयो देवमहोद

रनिभोदराः त्वया तु भगवन् सृष्टाः प्रजानाथ चतुर्विधाः ५४ त्वया दत्तोयमस्माकमायुषः पवनः

पतिः सोस्मान्प्राणेश्वरो भूत्वा कस्मादेषोद्य सत्तमः ५५ रुरोध दुःखं जनयन् अंतःपुर इव स्त्रियः तस्मा

त्वां शरणं प्राप्ता वायुनोपहता वयं ५६ वायुसंरोधनं दुःखमिदं नो नुद दुःखहन् एतत्प्रजानां श्रु

त्वा तु प्रजानाथः प्रजापतिः ५७ कारणादिति चोक्त्वासौ प्रजाः पुनरभाषत यस्मिन्वै कारणे वायु

श्चुक्रोध च रुरोध च प्रजाः शृणुध्वं तत्सर्वं श्रोतव्यं चात्मनः क्षम पुत्रस्तस्यामरेशेन इन्द्रेणाद्य

निपातितः ५८ राहोर्वचनमास्थाय ततः स कोपितोऽनिलः अशरीरः शरीरेषु वायुश्चरति पालयन्

५७ कारणादिति उक्त्वा किं विनाशणा न ८८ शरीरं हि विना वायुः समतां याति दारुभिः वायुः प्राणः सुखं वायुः

मयास्तीत्यर्थः यस्मिन्कारणे वायुश्चक्रोध तत्कारणं पुनरभाषत ५८ दारुभिः समतां याति दग्धामपि न चलतीत्यर्थः ८२

वायुः सर्वमिदं जगत् वायुना संप्रहीणस्य न सुखं विंदते जगत् अद्य ... ८३

श्रीवजनितमिवा पुनः ... ८२

166 रक्तःपदःफुल्लादित्योममग्रदःशमित्यामःप्रुपसाद्येनसंधिरार्षः९१ ग्रास्यतिग्रास्ले ९४ सदागतेर्वायोः गंधर्वऋषिपदेतिगुरुलत्तभेद
ग्रार्षः ९५ इत्यार्षेउत्तरकांडेपंचत्रिंशः ३५ ततइति तथानीयस्त्वेगितिमर्थः त्रिरूपयस्यायसतरतउपस्थानपूर्वकत्रिःसाष्टांगप्रणतवानि

प्रुधेवतेतिरुच्छासाःकष्टकूर्मायमाश्रितः तथामस्तत्रयस्तेमारुतेनारुव्वकप्दोदितः ९८ सर्वानायेगामि
च्छामस्तुप्रासाद्यादितेःसुते ततःप्रजाभिःसहितःप्रजापतिःसदेव गंधर्वभुजंगगुह्यकैः जगा
मयत्रास्यतितत्रमारुतःसुतंसुरेंद्राभिहतंप्रगृह्यसः ९१ ततोर्कवैश्वानरकांचनप्रभंसुतंतदोत्संग
गतंसदागतेः चतुर्मुखोवीक्ष्यकृपामयाकरोत्सदेवगंधर्वऋषीयराक्षसो ९५ इत्यार्षेउत्तरकांडे
पंचत्रिंशःसर्गः ३५ ततःपितामहंदृष्ट्वावायुपुत्रवधार्दितः शिशुकंतंसमादायउत्तस्थौधग्रतः १
चलत्कुंडलमौलिस्रक्तपनीयविभूषणः पादयोर्न्यपतत्वायुस्त्रिरुपस्थायवेधसे २ तंतुवेदविदा
तेनलंबाभरणशोभिना वायुमुत्थाप्यहस्तेनशिशुंतंपरिमृष्टवा ३ स्पृष्टमात्रस्ततःसोयसली
लंपद्मजन्मना जलसिक्तंयथासस्यंपुनर्जीवितमाप्तवान प्राणवंतमिमंदृष्ट्वाप्राणोगंधर्वहोम ५

तर्थः २ वेदविदाग्रानादितोशेषवेदार्थविदालंबभरणशोभिनाहस्तेनवायुस्तस्यपरिमर्शःस्पर्शः ३४ सर्वभूतेषुमतिरुद्धंसंत
त्वानिरोधंयथाभवतितथायथाप्रायथापूर्वमानप्रानात्मनावचार ५

दोववारसर्वभूतेषुसंतिष्ठंवयथा ५

ॐ गावा उदी ८५

त्रिगुणाः त्रीणि पुरमानि यस्य सः तानि यशोवीर्यं ऐश्वर्यं श्रियो ज्ञानवैराग्ये च त्रिककुता त्रिमूर्तिप्रधानः त्रिधामा त्रिलोकस्थानः ॰ व

मरुद्भ्यो यादि निर्मुक्तास्ताः प्रजा मु‾ताभवत् शीतवातविनिर्मुक्ताः पश्चिमस्य वसात्तुमाः ८ ततस्त्रिगु
णस्त्रिककुत्त्रिधामा त्रिदशार्चितः उवाच देवता ब्रह्मा मारुतप्रियकाम्यया ॰ भो महेन्द्राग्निवरुण
महेश्वरधनेश्वराः जानातामपि वः सर्वं वक्ष्यामि श्रूयतामिति ८ अनेन पिशुना कार्या कर्तव्यं वो
भविष्यति ददद्ध्वं वे मन्सर्वे मारुतस्य स्वतश्चेय ९ ततः सहस्रनयनः प्रीतियुक्तः शुभाननः नपा
दयमे यामालामन्तिप्यदे वचोब्रवीत् १० मत्करोन्मुक्तवज्रेणाहनुरस्य यथाहतः नाम्नावैकोपि
पाहेलो भविता हनुमानिति ११ अहमस्य प्रधास्यामि परंमवरमद्भुतं इतः प्रभृति वज्रस्य ममाव
ध्यो भविष्यति १२ मार्तण्डस्त्वब्रवीत्तत्र भगवांस्तिमिरापहः तेजसोस्य मदीयस्य ददामि शतिकाक
लां यदा च शास्त्राध्ययनेऽस्य शक्तिरस्य भविष्यति नदास्य शास्त्रं दास्यामि येन वाग्मी भविष्यति १४ व
रुणाश्च वरं प्रादान्नास्य मृत्युर्भविष्यति वर्षायुतशतेनापि मत्पाशादुदकादपि १५ यमो दण्डादवध्य

त्वाभिश्रूयतानिति रुवैश्रमार्षे कृमेशपर्याकांचनयमयो १० अहं मात्राप्रर्वं वरं दास्यामि १२ प्रतिको काकलं यातनममस्ते १३ पासंशा
स्ताध्ययनेतदर्थज्ञानेव १४ १५ तष्ट------ १० ॥

८५

168 मदायुधानं शूलादिपाशुपतास्त्रांतानां १८ महात्मा महानात्मा यस्याव ब्रह्मज्ञ इतियावत सर्वेषां ब्रह्मास्त्रांतानां ब्रह्मदंडः ब्रह्मर्षिक्रिय
माणः संहारोद्देश्यकः भवविष्यतिश्रुत्येतिशेषः २४ एवमुक्ता महेन्द्रादय इत्यर्थः सुमरैः परिवारदेवगणैः २५ वादत्तदत्तवरं २६
मत्तो मदायुधानां च अवध्योयं भविष्यति इत्येवं शंकरेनापि दत्तोस्य परमो वरः १९ विश्वकर्मा च दृ
ष्ट्वेमं बालरूपं महारथः मत्कृतानि च शस्त्राणि यानि दिव्यानि तानि च १५ नैरवध्यत्वमापन्नश्चि
रंजीवि भविष्यति दीर्घायुश्च महात्मा च ब्रह्मा तं शाब्रवीद्वचः २० सर्वेषां ब्रह्मदंडानामवध्यस्ते भवि
ष्यति २१ ततः सुराणां च वरैर्दृष्ट्वा हं तमलंकृतं चतुर्मुखस्तुष्टमना वायुमाह जगद्गुरुः २१ शत्रू
णां भयकरो मित्राणामभयंकरः अजेयो भविता पुत्रस्तव मारुत मारुति २२ कामरूपः कामचारी
कामगः प्लवतां वरः भवत्यव्याहतगतिः कीर्तिमांश्च भविष्यति २३ रावणोत्सादनार्थानि राम
प्रीतिकराणि च रोमहर्षकराण्येव कर्ता कर्माणि संयुगे २४ एवमुक्ता तमाश्वास्य मारुतं तमरैः सह
यथागतं ययुः सर्वे पितामहपुरोगमाः २५ सोपि गंधवहः पुत्रं प्रगृह्य गृहमानयत अंजनायास्त
माख्याय वरदानं विनिर्गतः २६ प्राप्य राम वरानेष वरदानबलान्वितः जवेनात्मनि संस्थेन सोसौ पू
र्णः सागर इवार्णवः २७ तरसा पूर्यमाणोपि तदा वानरपुंगवः आश्रमेषु महर्षीणामपराध्यति निर्भयाः
स्रोभ्भाण्डानि यज्ञीयकरणानि स्रुतिहोत्राणि अग्निहोत्रसाधनभूतान्ययः भग्नविच्छिन्नविध्वस्तान्सुसंभाराद्दिकर्माण्यां ज्याः सप्र

उ॰
रा॰
टी॰
८५

169 प्रावर्तत प्रावर्तयदित्यर्थः शंभुना ब्रह्मणः शक्तितः बलसामर्थ्यात् सहन्ते तद्दूषणं तेन तस्य चेष्टितमिति शेषः २२ क्रोधो जितो येन सः अमर्षः प्रति

एवंविधानि कर्माणि प्रावर्तत महाबलः सर्वेषां ब्रह्मदण्डानामवध्यः शंभुना कृतः २३ जानन्त ऋषयः
सर्वे सहन्ते तस्य शक्तितः तथा केसरिणा त्वेष वायुना सोञ्जनीसुतः प्रतिषिद्धोपि मर्यादां लंघयत्ये
व वानरः ततो महर्षयः क्रुद्धा भृग्वंगिरसवंशजाः २४ शेपुरेनं रघुश्रेष्ठ नातिक्रुद्धातिमन्यव बाधसे
यत्समाश्रित्य बलमस्मान् प्लवंगम २५ तद्दीर्घकालं वेत्तासि नास्माकं शापमोहितः यदा ते स्मा
र्यते कीर्तिस्तदा ते वर्धते बलं ततस्तु हृततेजोजा महर्षिवचनौजसा एषोश्रमाणि नान्येव मृदुभावं
गतोचरत् २६ अथर्क्षरजसो नाम वालिसुग्रीवयोः पिता सर्ववानरराजासीत्तेजसा इव भास्करः २७
स तु राज्यं चिरं कृत्वा वानराणां हरेश्वरः ततस्त्वृक्षरजा नाम कालधर्मेण योजितः २८ तस्मिन्नस्त
मिते वाक्ये मंत्रिभिर्मंत्रकोविदैः पित्र्ये पदे कृतो वाली सुग्रीवो वालिनः पदे सुग्रीवेण समं त्वस्य अ
द्वैधं छिद्रवर्जितं आबाल्यं सख्यमभवदनिलस्याग्निना यथा २९

क्रुद्धातिमन्यव अस्मन्मन्यवन्तीत्यर्थः २५ तद्दीर्घं वेत्तितदबलमित्यर्थः २६ हततेजोजाः अपहृतस्ववीर्यबलज्ञानः एषोश्रमाणीति शेषः
संधिः ऋतस्रजसरूपकारान्तः २८ वालिनःपदे यौवराज्ये सुग्रीवे यपकप्रकारं आबाल्यं बाल्यमारभ्य २९

170 यदैवरम्यस्थितंदेवहनुमानशापवशादेवात्मनोवलंनवेद ५॰ ननुहनुमतात्मनाभावेपिसुग्रीवःकिमितिनवोधितवानत्राह न
ह्येषइतिवालिनाभ्राम्यमाणएवसुग्रीवोपितद्बलंनवेदेत्यन्वयःकर्ष॥ तदपिदेवकार्ययावदेवतदातजांबुवतास्मारितः समुद्रतीरेनत
ज्ञातवान ५१ उक्तमेवपुनराहवेतितदासुग्रीववियत्समयेप्रख्यातवलः अप्रख्यातस्ववलपरिज्ञानः प्रतपवरणेकुंजररुहःसिंहइव
हितःसमीवसिंहितोयमास्थितएवनतुयुद्धकृद्बानितिसिंहः कुंजररुहेवेतिपाठांतरंतत्रसमर्थितार्थः ५२ पराक्रमःसहतस्यपिय

एषःशापवशादेवनवेदवलमात्मनः वालिसुग्रीवयोर्वैरंयदारामसमुस्थिते ५॰ नह्येषरामसु
ग्रीवोभ्राम्यमाणोपिवालिना देवजानातिनह्येषवलमात्मनिमारुतिः ५१ ऋषिशापाहृत
वलस्तदेषकपिसत्तमः सिंहःकुंजररुद्धोवाआस्थितःसहितोरणे ५२ पराक्रमोत्साहमतिप्रता
पसौशील्यमाधुर्यनयानयैश्च गांभीर्यचातुर्यसुवीर्यधैर्यैर्हनूमतःकोप्यधिकोस्तिलोके ५३
अव्यग्रमेनंपरिपूर्णचंद्रं कपिवर्षं ...प्रहृष्टमनाः कपींद्रः उदयाद्रिरिवस्तगिरिंजगामग्रंथंमह
हारयनप्रमेयः ५४

हकार्येषुउत्साहः उत्साहयदेनेनतेनकार्यविषयःमःस्मतिरथानिर्धारणंप्रतापःप्रभावःसौशील्यंसद्भावःतंमाधुर्यवाचिनयान
योनतमरिपानेनकमसहतिहतीकेगीनोभीर्यमायघदोभःस्ववीर्यस्वरक्षणेनपरपराभवःधैर्यमकंपचित्ताहनूमतएतैर्गुणैःको
प्यधिकोनकोपिसमर्थः ५२ उदयाद्रिरुदयगिरेःमदकुंड्यंस्वरत्तेजयरपराभवःधैर्यपादनप्रमटहणः न्यारस्यनप्रमेयइतितउभावः आर्षः

कोसौ गुण इत्यत्राह ससूत्रेति सूत्रमष्टाध्यायी लक्षणं तद्वृत्तिस्तत्कालिकास्तद्वृत्तिः अर्थपदं सूत्रार्थावबोधकपदं वार्तिकं महार्थं महा
भाष्यं पतंजलिकृतं संग्रहं व्याडिकृतं तत्सहितं सिध्यति वै सिद्धो भवति शास्त्रेषु तत्त्वदर्शीत्यर्थः तदेवाह नह्यस्य सदृशः शास्त्रे कश्चित्तच्छंदगतौ
पूर्वोत्तरमीमांसात्मवेदार्थनिर्णाय वैशारदे वैदुष्ये विपश्चित्त्वे व्याकरणादेर्हनूमान् अतिवप्रसिद्धिरिति कतकः उक्तमेव स्पष्टय

सूत्रवृत्त्यर्थपदं महार्थं ससंग्रहं सिध्यति वै कपीन्द्रः न ह्यस्य कश्चित्सदृशोऽस्ति शास्त्रे वैशारदे छंदग
तौ तथैव ४५ सर्वासु विद्यासु तपोविधाने प्रस्पर्धते यं हि गुरुं सुराणां प्रवीविविक्षोरिव सागरस्य लोका
न्दिधक्षोरिव पावकस्य लोकक्षयेष्वेव यथान्तकस्य हनूमतः स्थास्यति कः पुरस्तात् ४६ एष एव चान्ये
च महाकपीन्द्राः सुग्रीवमैन्दद्विविदाः सनीलाः सतारतारेयनलाः सरंभास्त्वत्कारणाद्राम सुरैर्हि सृष्टाः
४७ तदेतत्कथितं सर्वं यन्मां त्वं परिपृच्छसि हनूमतो बालभावे कर्म चैतत्कथितं मया ४८

तिसर्वास्विति अयं गुरुं प्रस्पर्धते प्रवीविविक्षोर्गाने मालावधिप्रकर्षणविशेषणावेष्टुमिति शेषः प्रवीरिति दीर्घ आर्षः लोकक्षयेषु
यानकालेष्वपच्छेदत्वसंधिरार्षः अन्येपि सृष्टाः तारेयो अंगदः ४७ ४८४९ ८९

172 ममैपनतवंदंसमागलत्तगांविज्ञाप्यमस्ति अत्रागतस्तदोहं यद्वादामि तद्भवद्भिर्मम कृते मति मितमनुकंपयाकर्तव्यं ५४ अहमागतो वत्
वा मा तेषां रादीन्स्वकार्येप्रस्याप्य कतत्करिष्यामि ५५ सदस्या विधिदर्शितः महावीर्याः महतयोवीर्यप्रक्ताः ५६ युष्मानाश्रित्या नित्या

श्रुत्वागस्त्यस्य कथितं रामाः सौमित्रिरेव च विस्मयं परमं जग्मुः सर्वीनुरागात्तैसैः सह ५० अथ पस्यस्त
ब्रवीद्रामं सर्वमेतच्छ्रुतं त्वया दृष्टाः संभाषितश्चासि राम गच्छाम हे वयं ५१ श्रुत्वो तद्राघवो वाक्यमेत
स्यसेयाग्रतेजसः प्रांजलिः प्रणतश्चापि महर्षिमिदमब्रवीत् ५२ अद्य मे देवतास्तुष्टाः पितरः प्रपि
तामहाः युष्माकं दर्शनादेव नित्यं तुष्टाः सबांधवाः ५३ विज्ञाप्यं तु ममैतद्धि यदहं मा गतः स्पृहः
तद्भवद्भिर्मम कृते कर्तव्यमनुकंपया ५४ पौरजानपदान्स्थाप्य स्वकार्येष्वहमागतः क्रतूनहं क
रिष्यामि प्रभावाद्भवतां सतां ५५ सदस्या मम यज्ञेषु भवतो नित्यमेव तु भविष्यथ महावीर्याः ममा
नुग्रहकांक्षिणः अहं युष्मानाश्रित्य तपोनिर्धूतकल्मषान् अनुगृहीतः पितृभिर्भविष्यामि
सुनिर्वृतः ५७ तदागंतव्यमनिशं भवद्भिरिह संगतैः अगस्त्याद्यास्तु तच्छ्रुत्वा ऋषयः शंसितव्रताः ५८
एवमस्त्विति तं प्रोच्य प्रयातुमुपचक्रमुः एवमुक्त्वा गताः सर्वे ऋषयस्ते यथागतम् ५९

सुनिर्वृतोहं पितृभिरनुगृहीतो भविष्यामि ५७ तदा आगंतव्यमिति विच्छेदः ५८ ५९

उ. 173 नमेनार्थयागतं ९० इत्यार्षे उत्तरकांडे षट्त्रिंशः ३६ ऋषिगणाश्चाभिषेककालसमागताः कथानकथाविष्टाः ततोऽभिषेक दिनस्य पानिशा
रामा- सापौराणां पूर्वाह्णप्रथमाह्न हर्षवर्द्धिनीत्य भूत्साच व्यतीतेनेमन्वयः १ रक्तकंठिनः मनुपरकेगः २ नयिसभेवाल्लेभहृते उपायधर्मोवृथा
उटी. राघवस्तु तमेवार्थं चिंतयामास विस्मितः ततोऽस्तं भास्करो याते विसृज्य नृपवानरान् ९० संध्यामुपास्य वि
८७ धिवत्तदा नरवरोत्तमः प्रवृत्तानो रजन्यां तु सोऽन्तःपुरचरोऽभवत् ९१ इत्यार्षे रामायणे उत्तरकांडे षट्त्रिंशः ३६
अभिषिक्ते तु काकुत्स्थे धर्मेण विदितात्मनि व्यतीतायां निशायां तु पूर्वाह्णे हर्षवर्द्धिनी १ तस्य राज
न्यावबुद्धर्थं यथातत्र नृपबोधकाः वंदिनः समुपातिष्ठन्सौम्या नृपतिवेश्मनि २ ते रक्तकंठिनः सर्वे किन्न
राः श्वाशिक्षिताः तुष्टुवुर्नृपतिं वीरं यथावत्संप्रहर्षिणः ३ वीर सौम्य प्रबुध्यस्व कौसल्याप्रीतिवर्धन
जगद्धि सर्वं स्वपिति त्वयि सुप्ते नराधिप ४ विक्रमस्ते यथा विष्णो रूपं चैवाश्विनोरिव बुद्ध्या बृहस्पतेस्तु
ल्यः प्रजापतिसमो ह्यसि ५ क्षमा ते पृथ्वीतुल्या तेजसा भास्करोपमः वेगस्ते वायुना तुल्यो गांभी
र्यमुदधेरिव ६ अप्रकंप्यो यथा स्थाणुश्चंद्रे सौम्यत्वमीदृशं नेदृशाः पार्थिवाः पूर्वं भवितारो नराधि
प ७ यथा त्वमसि दुर्धर्षो धर्मनित्यः प्रजाहितः न त्वां जहाति कीर्तिश्च लक्ष्मीश्च पुरुषर्षभ ८
नरहितेमतिसर्वेरागन्समयधर्मकंभवतियथाराजाभवतितिन्यायत ४ प्रजापतिसमः प्रजापरिपालनइतिभावः ६ ईदृशं सौम्यत्वं चंद्रेनान्यत्र
पूर्वं न संभवतिशेषः भवितारोऽग्रेइतिशेषः ७८
८७

१७५ पताश्चामास्त्रउक्तरतिशेषः १ पांडराच्छादनेउक्तराच्छादानपाटः ॥ सलिलंसहस्रीवेतिशेषः शोचायर्थमितिभावः ॥ मुदितानामना

श्रीश्चधर्मश्चकाऊन्त्स्वयिनिरंशतिष्टतो पताश्चानाश्चमध्यंवेदिभिःपरिकीर्तिताः १ स्रता
श्चसंस्नवैर्दिव्यैवेदियंतिस्मराघवं स्तुतिभिःस्तूयमानाभिःप्रत्यबुध्यतराघवः २ सतद्दिहायशय
नंपांडराच्छादनास्तृतं उत्तस्थौनागशयनाद्धरिनारायणोयथा ॥ तमुत्थितंमहात्मानंप्रह्वाःप्रांज
योनराः सलिलंभाजनैःशुभ्रैरुपतस्थुःसहस्रशः ३ कृतोदकःशुचिर्भूत्वाकालेहुतहुताशनः
देवागारंजगामाशुपुण्यमिक्ष्वाकुसेवितं ४ तत्रदेवान्पितॄन्विप्रानर्चयित्वायथाविधि बाह्यक
क्षांतरंरामोनिर्जगामजनैर्वृतः ५ उपतस्थुर्महात्मानोमंत्रिणःसपुरोहिताः रामस्योपविशन्यार्थं
शक्रस्येवयथामराः ६ तच्चिवास्त्रमहात्मानोमंत्रिणःसपुरोहिताः वसिष्ठप्रमुखाःसर्वेदीप्यमा
नाइवाग्नयः ७ भरतोलक्ष्मणश्चात्रशत्रुघ्नश्चमहायशाः उपासांचक्रिरेहृष्टावेदास्त्रयइवाध्वरं ८
याताःप्रांजलयोभूत्वाकिंकरामोदिताननाः मुदितामुदितार्थस्यावहवःसमुपाविशन् ९ वा
नराश्चमहावीर्याविंशतिःकामरूपिणः सुग्रीवप्रमुखारामंमुपासंतेमहौजसः १०

मकाःकिंकराः १० विंशतिवानराःसुग्रीवांगदहनूमज्जांबवत्सुषेणतारनीलनलमैंदकुमुदपनसशरभशतवलिगंधमादनगजवाक्षग

गवाक्षगवयशरभाःज्योतिर्मुखाविंशतिः प्रधानवानराः सर्वे इतिकेस
कं: १५

175 ऋषिभिः श्रावयमाणश्च वसिष्ठाद्यैः २२ तेन रूपेण सर्वलोकोपासन्नाकारेण २२ इत्यार्षे उत्तरकाण्डे सप्तत्रिंशः ३२ तत्र तु वालिसुग्रीवोत्पत्तिहा
साराव्णस्य चैव हीयमानेतिहासश्च कतये ये: सर्गे स्मरागस्त्योक्ति तयोक्त विमुक्तलकश्च हृष्य पत्ते सत्वश्चैव सर्गेन एवागस्त्यस्य सत्यस्य म

अ· रा· टी· ८८

विभीषणश्च रक्षोभिश्चतुर्भिः परिवारितः उपासते महात्मानं धनेशानुचरकाः २० तथा निगम
वृद्धाश्च कुलनाथेश्च मानवाः शिरसा वंदयन् राजानमुपासते विचक्षणाः २१ तथा परिवृतो राजन् वृद्धाश्च
ऋषिभिर्देवैः राजभिश्च महावीर्यैर्वानरैश्च समागतैः २२ यथा देवेश्वरो राम ऋषिभिः समुपास्यते अधि
कस्तेन रूपेण सहस्राक्षाद्विरोचते २३ तेषां समुपविष्टानां तास्ताः समधुराः कथाः कथ्यन्ते धर्म
संयुक्ताः पुराणज्ञैर्महात्मभिः २४ इत्यार्षे उत्तरकाण्डे सप्तत्रिंशः ३७ एतच्छ्रुत्वा निखिलं राघवोऽगस्त्य
मब्रवीत् यच्चर्क्षरजा नाम वालिसुग्रीवयोः पिता १ जगतीकथं भगवान्सा तथा परिकीर्तिता वा
लिसुग्रीवयोर्ब्रह्मन्माता नाम सा कृता २ एतद्वृत्तं समाचक्ष्व कौतूहलमिदं हि नः संप्राप्तो राघ
वेणैवमगस्त्यो वाक्यमब्रवीत् ३ श्रूयतां राम कथयामि तां यथा पूर्वं समासतः नारदः कथयामास ममा
श्रममुपागतः ४ कदाचिद् भ्रममाणोऽसावतिथिर्ममुपागतः अर्चितस्तु यथान्यायं दृष्टादृष्टेन कर्म
णा ५

गमनकथानादसंगतेः कतनीचनाहतनाचाम्याविनव्याख्यातः १२३४ ५ ८८

176 स्ववासीनः कथामीनामयाऽपृष्टः स्मकोतवान् कथयामास धर्मात्मा महर्षेश्रूयतामिति ८ मेरुर्नगवरः श्रीमा
नजांबूनदमयः शुभः तस्य यन्मध्यमं शृंगं सर्वदैवतपूजिते ९ तस्मिं दिव्या सभा रम्या ब्रह्मणः शतयोजनात
स्समास्था सदा देवः पद्मयोनिः स्वतंभुवः ८ योगमभ्यसनस्तस्य नेत्राभ्यामपतदश्रुसवत् तद्गृहीतं भगवता
पाणिना वर्त्तितं ततः ९ निमिषमात्रेण तद्गैर्ब्रह्मणा लोककर्त्तृणा तस्मिन् पुंकाणो नाम वानरः स बभूव ह १०
उत्पन्नमात्रस्तु तदा वानरस्स नरोत्तम समाश्वास्य प्रयत्नैर्वा कैरकः किल महात्मना ११ पद्मपत्रैः स विस्तीर्ण
स्वैरादिषितं सदा तस्मिं रम्ये गिरिवरे वटमूलफलाशनः १२ ममांतिकचरो नित्यं भव वानरपुंगव कंचित्का
लमहास्के[illegible]ततः श्रेयो भविष्यति १३ एवमुक्तः स वै तेन ब्रह्मणा वानरोत्तमः प्रणम्य शिरसा पादौ देवदेवस्य
तस्य १४ उक्तवांल्लोककर्त्तारमादिदेवं जगत्पतिं यथाज्ञापयसि देव स्थितोहं तव शासने १५ एवमुक्त्वा हरि
देवयस्यां रूपमनसा सदा स तदा द्रुमाविटपफलपुष्पद्रुमेषु च १६ ब्रह्मणांतिबलः पीत्वा वने फलकृताशनः वि
चरत्पवनसाध्यानि चित्रसुपुष्पाण्यनेकशः १७ दिने दिने च मायाह्ने ब्रह्मणोंतिकमागमत् गृहीत्वा नमनानुरूपा
णि पुष्पाणि च फलानि च १८ ब्रह्मणो देवदेवस्य पादमूले न्यवेदयत एवं तस्य गतः कालो बहुः पर्यटतो गिरिं १९ क
स्यचित्त्वथ कालस्य समतेन स्वयंभुवः [illegible]वानरश्रेष्ठस्तृषया परिपीडितः २० अगरमेरुशिखरं गतस्तत्र च
दृष्टवान् नानाविहगसंघुष्टं पद्मसंसलिलस्रवः २१ वल्कलैः स समात्मानं कृत्वा नस्य तटे स्थितः ददर्श तस्मिंसर

शिवरुद्राख्यानमाहात्म्यं २९

ॐ. यजु. टी. ८५

केयमस्मिन्ममविपुर्वसत्वंतर्नलेमहान् रूपंवांतर्गतेतत्रवीक्ष्यतस्यपतोहरिः २२ कथाविष्णमनोद्धोषनियतंमा
वमन्यत तदस्यदृष्टभावस्यशक्तलंकमेतंगेहे २४ एवंसंचिंत्यमनसा सवैवानरवापलात् ग्रास्तत्रवापतः
तस्मिन्देवानरस्तनमः उत्पतनस्मान्तस्यदाहास्थितः सवगाश्चनः तस्मिन्नेवक्षणेरामस्वीतत्रायसवानरः म
नोत्तरूपासानीतंलावण्यललिताशुभा हृद्यतेरवमामातिस्तनुयष्टिलतायथा त्रैलोक्यसुंदरीकाद्यासर्वे
चितप्रमाथिनी लक्ष्मीवपप्रसाहिताचांद्रज्योत्स्नेवविनिर्मला २९ रूपेणाप्यभवत्सान्नश्रियंदेवामृपायथाधो
तयतीतिशः सर्वास्तत्राभवत्साववरगता ३० एतस्मिन्नंतरेदेवानांनिखिलः स्वरनायकः पादावुपास्यदेवस्यब्रह्मणोस्त
नवैयथा ३१ तस्यामेववेलायामादित्योपिपरिभ्रमत् ततस्मिन्नेवप्रायायस्मिन्स्नातनुमध्यमा ३२ युगप
त्सा तदारूपाद्देवाभ्यांसुरसुंदरी कंदर्पवशगौतौ तद्दृष्ट्वातांसंबभूवतुः ३३ ततःक्षुभितसर्वांगौस्वैरंद्वाय
नमादिव तद्रूपमेवतंदृष्ट्वासाजितोधैर्यमात्मनः ३४ ततस्तस्यास्वैरंदेणस्य केशीस्तपातितं ग्रनासाधे
वेतानारीसंनिहृतमथाभव ततः सवानरपतिर्जज्ञेनैवानरीश्वरः प्रमोदवेतसस्तस्यवासवस्यमहात्मनः ३६
वालीषुपतितंवीजंवालीतामवभूवसः भास्करेणापितस्यैवकंदर्पवशवर्जितः वीजंतनशाके ग्रीवायांपि
धानमनुवर्तत तेनापिसावरतनुनोक्तः किंचिद्वचः शुभः ३८ निहितमदनस्यौथसूर्योपिसमपद्यतः ग्रीवा
यांपतितेवीजेसुग्रीवःसमजायत ३९ एवमन्याघवीरोवानरेंद्रोचमहाबलौ दत्वातकांचनीमालांवानरेंद्रस्य

श्री ८५

178 मुक्तयोगुणसंपूर्णाशक्रस्त्वविदिवंययौ सूर्योपित्वमृतस्यैवनिजंपुत्रवानात्मजं ५१ कृतेपुत्रववसायेपुत्रजना
ममवितावरं तस्यानिशायांस्वुष्मायांसदितेचदिवाकरे ५२ सतद्वानरहपंतत्प्रतिपेदेपुनर्नृप सपवनानरो ५५
भ त्वा पुत्रौ सुसमसवेगमौ पिंगत्रो हरिवौवलिनौकामरूपिणौ मध्यमस्तकल्यानिपातितेनुगतोतदा
दद्मजस्त्वरजास्तौतु वृक्षणोंतिकमागमत् दृष्ट्वादेवसूजंपुत्रंवल्लोकपितामहः ५५ वद्रुशःसान्वयामा
सपुत्राभ्यांसहितंतदा सांवयित्वाततःपश्चादेवहृतमथादिशत् गच्छमद्वचनाद्दूतकिष्किंधांनामवैशुभां
सर्वस्मगुणसंपन्नामहतीचपुरीशुभा तत्रवानरयूथानिसवहूनिवसंतिच वहुरत्नसमाकीर्णावा
नेकामरूपिभिः प्राणपाक्षपवतीद्गोचानर्वेणपुरस्कृता विश्वकर्मकृतादिव्यामन्नियोगात्प्रशोभता
तत्रक्षरजसं दृष्टामपुत्रंवानरर्षभं यूथपालान्समाहूयतांश्चान्यान्प्रकृतान्हरीन् तेषांसमाक्षसर्वेषांमदी
यजनसंसदि अभिषेचयराजानमारोप्यमहदासने दृष्टमात्रास्त्वतेसर्वेवानरेणावधीमता प्रसन्दार
त्वसामनिसंभाविषांतिवशानुगाः इत्येवमुक्तेववनेवस्मणातेहरीश्वरं पुरतःकृत्वहतोसौप्रययोनेपुरी
शुभां सप्रविशातिलुगतिस्ताग्रहांवानरोत्तमं स्थापयामासराजानंपितामहनियोगतः राज्याभिषेकवि
धिनास्नातोयाभ्यर्थितस्तथा सवहुमकुटश्रीमानभिषितःस्वलंकृतः आज्ञापयामासहरीन्सर्वान्
दितमानसः सप्तद्वीपसमुद्रायांपृथिव्यांयेस्वंगताः वालिसुग्रीवयोरेवयोरेषाचवंशजःपिन ततनीवे

ॐ. रा. उ. टी. ५९

179 यस्त्वेतच्छ्रावयेद्विद्वान्यश्चैतत् शृणुयान्नरः सिध्यंति तस्य कार्यार्थाः मनसा हर्षवर्धनाः एतच्च सर्वं कथितं यथा
विभो प्रविस्तरेणेह यथार्थवत् उत्पत्तिरेषा रजनीचराणां ख्यातैव हे हरीश्वराणां ५९ इत्यार्षे अष्टविंशः
एतां श्रुत्वा कथां दिव्यां पौराणीं राघवस्तदा भ्रातृभिस्सहितो वीरो विस्मयं परमं ययौ १ राघवोप्यत्र हर्षेणाकु
स्कृत्वा वचनमब्रवीत् कथयं महती पुण्या त्वत्प्रसादाच्छ्रुता मया २ हूहकौतूहलेवास्मिन्संहतो मतिपुं
गवः उत्पत्तिर्या हरीणां दिव्या वालिसुग्रीवयोर्द्विज ३ किंचित्रेमम वहुलर्षं सर्वैः तपनावुभौ जनौ वानरशार्दूला
वलेन वालिना वृता ४ एवमुक्तेन रामेण कुंभयोनिरभाषत एवमेतन्महाबाहो हनुमासीत्पुरा किल ५ श्रु
यापरां कथां दिव्यां शृणु राजन्सनातनं यदर्थं राम वैदेही रावणेन पुरा हृता तत्ते कीर्तयिष्यामि समाधिं
श्रवणे कुरु पुराकृतयुगे राम प्रजापतिसुतं प्रभुः ७ सनत्कुमारमासीनं रावणो राक्षसाधिपः वपुषा सूर्यसं
काशं ज्वलनमिव तेजसा ८ विनयावनतो भूत्वा ह्यभिवाद्य कृतांजलिः उक्तवान्रावणो राम तमृषिं सत्य
वादिनं कोह्यस्मिन्प्रवरो लोके देवानां बलवान्नरः यं समाश्रित्य विबुधा जयंति समरे रिपून् १० जपकं तद्द्विजा
नित्यं कं ध्यायंति च योगिनः एतन्मे शंस भगवन्विस्तरेण तपोधन ११ विदित्वा हृद्गतं तस्य ध्यानदृष्टिर्महायशाः
उवाच रावणं प्रेम्णा श्रूयतामिति पुत्रकः १२ यो वै भर्ता जगत्कृत्स्नं यस्योत्पत्तिं च विद्महे सुरासुरैर्नतो नित्यं स हरि
नारायणः प्रभुः १३ यस्य नाभ्युद्भवो ब्रह्मा विश्वस्य जगतः पतिः येन सर्वमिदं सृष्टं विश्वं स्थावरजंगमं १४

९. तं समाश्रित्य विबुधा जयंति समरे रिपून् किं वा ति समरे वैरम्
विनाश्रयं कर्ति १५

180 रणेस्मिन्नेवं दैत्येश्वरं वरार्तेस्तथैव च ध्यायंति योगिनो नित्यं कृतभिक्षा जयंति तं १९ दैत्यदानवरक्षांसि येचान्ये
चामराः द्विषः सर्वान्जयति संग्रामे सदा सर्वैः सपूज्यते ७ श्रुत्वा महर्षेस्तद्वाक्यं रावणो राक्षसाधिपः उवाच प्र
णतो भूत्वा पुनरेवं महामुनिं १८ दैत्यदानवरक्षांसि येहताः समरे त्वया क्वा गतिं प्रतिपद्यंते किं च ते हरिणा ह
ताः रावणस्य वचः श्रुत्वा प्रत्युवाच महामुनिः दैवतैर्निहतानित्यं प्राप्नुवंति दिवि स्थलं २० पुनस्तस्मात्परि
भ्रष्टा जायंते वसुधातले पूर्वार्जितैः सुखदुःखैर्भुमौ जायंते च म्रियंते च २१ येयेहताश्चक्रधरेण राजंस्त्रैलोक्यनाथे
न जनार्दनेन ते तेगताः सन्निलयं नरेंद्राः क्रोधोपिदेवस्य वरेण तुल्यः २२ श्रुत्वा ततस्त्वहं तं निशाचरः सनत्कुमा
रस्य मुखाद्विनिर्गतं ततः प्रहृष्टः स बभूव विस्मितः कथं त्वयास्मामिह विं महाहवे २३ इत्यार्षेपकानविंशः २९
एवं चिंतयतस्तस्य रावणस्य दुरात्मनः पुनरेवापरं वाक्यं व्याजहार महामुनिः १ मनसः प्स्थितं यत्तद्विष्णु
महाहवे सखीभव त्वसद्भावाद्यो कचित्कालमुदीक्षय २ एवं श्रुत्वा महाबाहुस्तन्मध्ये ध्रुवा वाचसः केहूसल
क्षणं तस्य ब्रूहि सर्वमशेषतः ३ रावणस्यैव वचः श्रुत्वा समुनि प्रभाषत श्रूयतां सर्वमाख्यास्ये तवरावणपुंगवः
सहि सर्वगतो देवः सूक्ष्मोव्यक्तः सनातनः तेन सर्वमिदं व्याप्तं त्रैलोक्यं सचराचरं ५ सभूमौ दिवि पाताले प
र्वतेषु वनेषु च स्थावरेषु चमसेषु नदीषु नगरीषु च ६ ॐ कारश्चैव सत्यश्च सावित्री पृथिवी च सः धराधरध
रो देवो ह्यनंतः इति विश्रुतः ७ अहं त्र्यरात्रिरुद्रश्च भवस्तं भो दिवाकरश्चैव यमश्च सोमः सपवकाल्लोयनलोन

ग्रं॰ रा॰उ॰ टी॰ ८१ 181

विधेयानतिमल्लमिभातिलोकान्सृजत्ययं संहरतिप्रणाम्ति, कौशिकेरोत्पन्नपलोकनाथो विलः पुरातो भवता
प्राक् ९ अथवा बहुनानेन किमुक्तेन दशाननः तेनसर्वमिदं व्याप्तं त्रैलोक्यं सचराचरं १० नीलोत्पलदलश्या
मः किंजल्कारुणवाससा प्रावृट्काले यथा व्योम्नि सतडित्तोयदो यथा ११ श्रीमानेतद्वपुर्नामः स्वप्रभः पंकजेला
वेनः श्रीवत्सेनावृतो युक्ताः शार्ङ्गचक्रेन लक्षणः १२ तस्मान्नियं पापीरस्य मेघसेवणातद्रुदाः संग्राममूर्धाणिल
क्ष्मीर्देहमाहतिमाशिति नसशक्यः सुरैर्द्रष्टुं नासुरैर्नचपन्नगैः यस्य प्रसादं कुरुते सवैनं द्रष्टुमर्हति नहियज्ञ
फलैस्तानितन्याभिस्तसंचितैः शक्यते भगवान्द्रष्टुं न दानेनन चेज्यया तद्भक्तैस्तद्गतप्राणैस्तच्चित्तैस्तत्परायणै
वाक्यते भगवान्द्रष्टुं ज्ञानेनिर्दग्धकिल्बिषैः १४ अथवा कच्छ्रद्धाते यदि तं द्रष्टुमिच्छसि श्रूयतां कथयिष्यामि ति सर्वेषु
यतो यादेवब्रते १८ कृते युगेत्वतीते वै मुखे त्रेतायुगस्य तु हितार्थं देवमर्त्यानां भविता नृपविग्रहः इक्ष्वाकूणां
वंशे राजा भाव्यो दशरथो भुवि तस्य सूनुर्महातेजा रामो नाम भविष्यति १९ महातेजा महाबाहुर्महाबलप
राक्रमः महाबलो महासत्वः क्षमया पृथिवीसमः अदित्य इव दुष्प्रेक्ष्यः समरे शत्रुभिस्तदा भविता हितदा रामो
नतेमारावणः प्रभुः पितुर्नियोगात्स विभुर्दण्डके विविधा वने विचरिष्यति धर्मात्मा सभ्राता समहात्मनः २२
तस्य पत्नी महाभागा लक्ष्मीः सीतेति विश्रुताः उद्दिता जनकस्यैषा उत्पिता वसुधानलात् २२ रूपेणाप्रति
मालोके सर्वलक्षणलक्षिता छायेवानुगता रामं निशाकरमिवप्रभा २४ शीलाचारगुणोपेता साध्वी धैर्य

समन्विता सहस्रांशोः रश्मिभिरिव ह्येकामूर्तिरिवस्थिता २५

८

182 एवं ते सर्वमाख्यातं मया रावणविस्तरात् महतो देवदेवस्य एशास्वनस्वायंभुपस्य च २९ एवं उक्त्वा महाबाहू रावणो ते सं
प्रतापवान् तथा सह विरोधेन कुञ्चितश्यास राघव ३० सनत्कुमारान्त हा वाक्यं चिंतयामास राक्षसः रावणो मुमुदे श्री
मान्सुहार्थं विवचार ह ३१ श्रुत्वा तु वाक्यं सनत्कुमारविस्मयोत्फुल्ललोचनः शिरसा चाञ्जलिं कृत्वा विस्मयोपरमं गतः २६
श्रुत्वा तु वाक्यमेतच्च वसन्तो दायतो विस्मयमान च तः पुनश्च तं तु तावंतो धर्मात्मा यथा नरवाच वाक्यं वद मे प्रसातेन ३०
इत्यार्षे उत्तरकांडे चत्वारिंशः ४० ततः पुनर्महातेजाः कुंभयोनिर्महायशाः उवाच रामं प्रणतं पितामहसुवंश्यं
श्रूयतामिति चोवाच रामं सत्यपराक्रम यथा शेषं महातेजाः कथयामास स प्रभुः १ यथाख्यातं कृतं चैव
यथा हृतं यथा तथा श्रीतान्मा कथयामास राघवाय महामतिः २ एतदर्थं महाबाहो रावणेन दुरात्मना स
ता जनकराजस्य सुता राम महामते ४ एतां कथां महाबाहो नारदः स महायशाः कथयामास दुर्धर्षो मेरो
गिरिवरोत्तमे ५ देवगंधर्वसिद्धानामृषीणां च महात्मनां कथयामास पुनः सोथ कथयामास राघव ६ ना
रदः स महातेजाः प्रहसन्निव मानद तं दृष्ट्वा करणाराजेन्द्र महापापप्रणाशिनी ७ यां तच्छ्रुत्वा महाबाहो रुष
यो देवतैः सह ऊचुस्तं नारदं सर्वे हर्षपर्याकुलेक्षणाः ८ यश्चेमां श्रावयेन्नित्यं शृणुयाद्वापि भक्तितः स पुत्र
पौत्रवान् राम स्वर्गलोके महीयते ९ इत्यार्षे एकचत्वारिंशः ४१ ततः स रावणो नाम पर्यटन्पृथिवीतले वि
जयार्थी महाघोरैः राक्षसैः परिवारितः १ दैत्यदानवरक्षःसु यं पश्यति बलाधिकं तमाह्वयति युद्धार्थं राव

गोवत्स दकि। २

183 एवंसपर्वतवनांवीषषषिवीषिवीपति ब्रह्मलोकान्निवर्तंतेसमासायथराघवाः ब्रंरंतैमेघ्यषष्टस्यशुभंमंतमि
ॐ. वापरं तममिस्तनिश्रीतात्माह्यभिवाद्यकृतांजलिः ४ उवाचहृष्टमनसोनारदंराघवस्तदा ब्रह्मब्रह्मभवने
रा.उ. लोकास्त्वया हृष्टा ह्यनेकशः ५ कस्मिंलोकेमहाभागमानवायकृतांजलि येोऽत्रमिच्छामिनेःसार्धय
टी. घ्याकामेयहच्छया ६ चिंतयानामहृतेतनारदःप्रत्युवाचतं श्रुणुराजन्महाद्वीपंक्षीरोदस्यसमीपतः ७ त
५२ त्रतेवृंदसंकाशामानवाश्चमहाबलाः महाकायामहावीर्यामेघस्तनितनिःस्वनाः महामायाधैर्यवंतोम
हापरिघवाहवः श्वेतद्वीपेमयादृष्टामांमानवाराज्ञसत्तम्मियः बलवीर्यासमुपेतान्याहश्वेतान्विमेहेश्वसि
नारदस्यवचःश्रुत्वाराघवःप्रत्युवाचह ९ कथंनारदजायंतेतस्मिन्द्वीपेमहाबलाः श्वेतद्वीपेकथंवासःश्रा
मलेस्तमहात्मभिः ११ एतमिसर्वमाख्याहिप्रभोनारदतत्त्वतः त्वयाहृष्टंजगत्सर्वंहस्तामलकवत्सदा १२ हंसपा°श्वेतद्वीपवर्णनम्: १८
रावणस्यवचःश्रुत्वानारदःप्रत्युवाचह अनन्यमनसोनित्यंनारायणपरायणाः तदाराधनसक्ताश्चतच्चि
तास्तत्परायणाः एकांतभावोनुगतानाऐननारायद्दक्षिपिय १४ तच्चिन्तास्तद्गतप्राणानरानारायणेसदा
श्वेतद्वीपेततेवासंप्रार्जितःस्वमहात्मभिः १५ येहतालोकनाथेनशार्ङ्गःमानस्यसयुगे चक्रायुधेनदेवेनते
भावासमभिविष्टये १६ नहियज्ञफलस्तातनतपोभिर्नसंयमैः नचदानफलैःमोक्षैःसलोकःप्राप्यतेश्व
त्वं १७ नारदस्यवचःश्रुत्वादशग्रीवःसविस्मितः ध्यात्वातस्यचिरंकालंतेनयोत्स्यामिसंयुगेः श्राशक्तानार ५२

184 नारदोपिविरंध्यानाकौतूहलसमन्वितः १९ दिदृक्षुःपरमाश्चर्यंतच्चैवत्वरितंययौ सहिकेलिकरोविप्रोनित्यं
चसमरप्रियः २० रावणोपिययौतत्रराक्षसैःसहराघव महतासिंहनादेनदारयन्सदिशोदश २१ गतेतुनारदे
तत्ररावणोपिमहायशाः प्राप्यश्वेतंमहाद्वीपंदुर्लभेयत्सुरैरपि २२ तेजसातस्यद्वीपस्यरावणस्यबलेयसः त
स्यपुष्पकंयानंवातवेगसमाहतं २३ स्थातुंनशक्नोतिवाहाहतस्त्वाम्बुदः सचिवाराक्षसेंद्रस्यद्वीपमा
साद्यदुर्दृशं २४ ऊचुर्वैरावणंभीताराक्षसाजातसाध्वसाः राक्षसेंद्रवयंमूढाःभ्रष्टसंज्ञाविचेतसः २५ स्था
तुंस्यातुंनशक्ष्यामोयुद्धंकर्तुंकथंचन एवमुक्त्वाऽद्रवंस्तेसर्वएवनिशाचराः २६ रावणोपिहितद्यानंपुष्प
कंहेमभूषितं विसर्जयामासतदासहतैःक्षणदाचरैः २७ गतेतुपुष्पकेरामरावणोराक्षसाधिपः कृत्वारू
पंमहाभीमंसर्वराक्षसवर्जितः २८ प्रविवेशतदातस्मिंश्वेतद्वीपेसरावणः प्रविशन्नेवतत्राथनारीभिरु
पलक्षितः एकयासस्मितंकृत्वाहस्तेगृह्यदशाननं इष्टंस्यागमनंब्रूहिकिमर्थमिहचागतः ३० को
वात्वंकस्यवापुत्रःकेनवाप्रहितोवद इत्युक्तोरावणोराजन्क्रुद्धोवचनमब्रवीत् ३१ अहंविश्रवसःपुत्रो
रावणोनामराक्षसः युद्धार्थमिहसंप्राप्तोनचपश्यामिकिंचनः ३२ एवंकथयतस्तस्यरावणस्यदुरात्मनः
प्रहसंतेततःसर्वस्तत्युवतीजनाः ३३ तास्वामेकाततःक्रुद्धाबालवद्गृह्यलीलया भ्रामितस्तस्यसखीमध्ये प्रक्षिप्तसर्गे ५४

अ॰ रा॰ टी॰ ५३

185 सावीमम्मोस्म्माद्द्दयपश्चपतंकीटकंथजं दृष्णास्येविंशतिभुजंहृत्स्नांजनसमप्रभं हस्ताद्दूस्तंसवदितिमोभ्राम्य
तेभ्रमत्लात्तसः भ्राम्यमाणेनवलिनाराहसेनविपश्चिता याणावेकाघ्रसंदृष्टारोषेणवनिताशुभा मकसत्या
शुभः कीटोधुतंत्वाहसवेदनो गृहीत्वाम्यातरादेंद्रस्मपातविहायसा ततस्तामपिसंजृहोविददारन
खैर्मखेण तथामहविनिर्धुतः सहसैवनिशाचरः पपातसोभवाम्थ्येमागारस्यभयानकः ४७ पर्वतस्येवशि
खरंयथावज्रविदारितं प्रायत्सागरतजलेतथासेवनिपातितः ४८ पवंसरावणोरामस्वेतद्वीपनिवासि
भिः युवतीभिर्विगरह्याशुभ्राम्यतस्तततस्ततः ४९ नारदोविमहातेजाभावणेशाप्यथर्षिने विस्मयेस्सविरोगता
प्रजाहासमनर्त्तव एतदर्थंमहावाहोरावणेनदुरात्मना विसपद्याहृतासीतावन्नोमरणकांक्षया ५१ भ
वान्नारायणोदेवः शंखचक्रगदाधरः शार्ङ्गःपद्मायुधोवत्नीसर्वदेवनमस्कृतः श्रीवत्साकोहृषीकेशःस
र्वदेवाभिपूजिताः पद्मनाभोमहायोगभक्तानामभयप्रदः वधार्थंरावणस्यत्वंप्रविष्टोमानषीतनुं किं
नवेत्सितत्त्वमात्मंयथानारायणोह्यहं मामन्यस्वमहाभागस्मरत्वात्मानमात्मनाग्रह्याकुस्पतरंत्वंहिसर्व
माहपितामहः ५० त्रिगुणस्त्वंत्रिवेदैहिंत्रिधामात्रिवराघव त्रिकालकर्मत्रैविद्यत्रिदशारिप्रदर्शन ५४ त्व
याक्रांतास्त्रयोलोकाः पुराणेविक्रमैस्त्रिभिः त्वमहेंद्रानुजः श्रीमान्बलिवंधनकारणात् अदित्यागर्भसंभूतो ५३

विष्णुसंहितायां ५

186 इत्यार्षे रामायणे उत्तरकांडे सप्ततिः सर्गः अथ रामं तरान विसर्ज्य पंचमासेश्च तिष्ठत्सु सर्वीयास्येन प्रशासनं राज्ये तं ग्रम्यरूत्नात्तममभावः १ ॥

लोकाननुगृहीतं वै प्रविष्टो मानुषीं तनुं तदिदं साधितं कार्यं सुराणां सुरसत्तम निहतो रावणः पाप
मपुत्रगणबांधवः ५१ प्रहृष्टाश्च सुराः सर्वे ऋषयश्च तपोधनाः प्रशांतं च जगत्सर्वं त्वत्प्रसादात्सुरेश्व
र ५२ सीता लक्ष्मीर्महाभागा संभूता वसुधातलात् तदर्थमियमत्रानाज्जनकस्य गृहे प्रभो ५३ लंका
मानीय यत्नेन मातेव परिरक्षिता एवमेतत्समाख्यातं तव राम महायशः ५४ ममापि नारदेनोक्तं सु
चिरं दीर्घजीवितं यथा सनत्कुमारेण व्याख्यातं तस्य राक्षसः ५५ तेनापि च तदेवास्युक्तं ते सर्वं मयो
षतः यश्चैतत् श्रावयेत् श्राद्धे विद्वान्ब्राह्मणसन्निधौ ५६ अन्नं तदक्षयं दत्तं पितॄणामुपतिष्ठति ए
तां श्रुत्वा कथां दिव्यां रामो राजीवलोचनः ५७ यं विस्मयमापन्नो भ्रातृभिः सह राघवः वानराश्च स
सुग्रीवा राक्षसाः सविभीषणाः ५८ सर्वे चोत्फुल्लनयनाः सर्वे हर्षसमन्विताः राममेवानुपश्यंति
स्म रामं ते तु हर्षिताः ५९ ततोगस्त्यो महातेजा राघवं वेदमब्रवीत् दृष्टाः संभाजिताश्चापि राम
यास्यामहे वयं एवमुक्त्वा गताः सर्वे पूजितास्ते यथागतं ६१ इति उत्तरकांडे सप्ततितमः सर्गः एवमास्ते
महाबाहुरहन्यहनि राघवः प्रशासन्सर्वकार्याणि पौरजानपदेषु च १

ॐ रा० टी० ९४

187 कैतिपियाह स्वशयेनाश्विनितिशेषः २ भवान्हिगतिस्त्वयग्रंथवलाभ्रतिष्ठेत्यर्थः भवाताववंताताः कन्याप्रदानादिनापालितवंशः नेजस्मानयोर्वैर्यिणा १
संबंधकयुवोगमाः संबंधः प्रयोगमेयसे रोयासातः संबंधःप्रीतयस्वेत्यर्थः ५ रत्नानादायग्रस्माभिदींयमानोनयमवस्त्वनिभरतः इच्छतोऽ

ततः कपियथाहस्माधिवैदेहंमिथिलाधिपं राघवः प्रांजलिर्भूत्वावाक्यमेतदुवाचह ६ भवान्हिगविश्व
ग्राभवतापालितावयं भवतस्तेजसोग्रेणरावणोनिहतोमया ईक्ष्वाकूणांचसर्वेषांमैथिलानांचस
र्वशः ऋतुलाः प्रीतयोराजन्संबंधकवयोगमः तद्भवान्स्वपुरंयातुरत्नान्यादाययार्थिव भरतस्सस
हायार्थः इच्छतस्त्वानयास्यति ७ सतथेतिततःकृत्वाराघववाक्यमब्रवीत् प्रीतोस्मिभवतोराजन्द
र्शनेनायनेनच ८ यान्येतानिचरत्नानिमदर्थंसंचितानिवै दुहित्रोस्तान्यहंराजन्सर्वाण्येवददामिवै
ततः श्रयाजनकेकेयकरुधमातलंपभ तं राघवः प्रांजलिर्भूत्वाविनयाद्वाक्यमब्रवीत् इदंराज्यंमह
चैवभरतश्चसहलक्ष्मणः आयत्तास्त्वहिनोराजन्सतिश्चपुरुषर्षभ ९ राजाहिवृद्धसंतापेन्त्वदर्थमु
पयास्यति तस्माद्गमनमेवैवंरोचतेतवपार्थिव १०

यास्यतिइष्ट भंपत्तोमयुगमनरूयसत्कारार्थं ५ सतथेतिकृत्वाअंगीकृत्वेत्यर्थः ८ मदर्थंप्रीत्याममदानार्थंकेकयंमातुलयुधिजितं ८
यतद्राज्यमयोध्याराज्यमहंरामः भरतलक्ष्मणौआयत्तस्त्वपीतशेषः त्वदधीनाइत्यर्थः हराजन्हेकेकेयपुरवराजरानोस्माकंत्वंगतिरापदीदृशः ९४

188 अन्तयात्रेणाग्रनुयात्रपचारद्रूपेणाग्रनुगमे षष्ठेतमभ्युपानितिशेषः ११ मातुलद्रानामेणाभियायप्रदक्षिणं कृत्वा युधाजितनएश्चात्मार्वभौम
नाह्राज्ञानं प्रदक्षिणं कृत्वा प्रयातेश्मनन्वयः १३ हृष्टाम्नेरहहेतसनेविष्णुनो येदेण महर्षिणो वामदेवायथा विमुविसृष्टिनि तथा तके यं विसृजे मर्थः १४ १५

लक्ष्मणेनानुयात्रेण पृष्ठतोऽनुगमिष्यते धनमादाय बहुलं रत्नानि विविधानि च ११ युधाजितो तथे
त्याह गमने प्रति राघव रत्नानि च धनं चैव त्वय्येवाक्षय्यमस्त्विति १२ प्रदक्षिणं च राजानं कृत्वा केक
यवर्धनः रामेण सत्कृतः पूर्वमभिवाद्य प्रदक्षिणं १३ लक्ष्मणेन सहायेन प्रयातः केकयेश्वरः हृ
तेऽसुरे तु यथा वृत्रे विष्णुना सह वासवः १४ तं विसृज्य ततो रामो वयस्यमकुतोभयं प्रतर्दनं काशिपतिं
परिष्वज्येदमब्रवीत् १५ दर्शिता भवता प्रीतिर्दर्शितं सौहृदं परं उद्योगश्च त्वया राजन्भरतेन कृतः
सह १६ तद्भवानद्य काशेय पुरीं वाराणसीं व्रज रमणीयां त्वया गुप्तां सुप्राकारां सुतोरणां १७ एता
वदुक्त्वा चोत्थाय काकुत्स्थः परमासनात् पर्यष्वजत धर्मात्मा निरंतरमुरोगतं विसर्जयामास तदा
कौसल्याप्रीतिवर्धनः राघवेण कृतानुज्ञः काशेयो ह्यकुतोभयः १९ वाराणसीं ययौ तूर्णं राघवेण
प्रस्मात्वया भरतेन सहरणसहयार्थमुद्योगः कृतस्तस्माद्भरतः विसर्जितः विसृज्य तं काशिपतिं त्रिशतं पृथिवीपतीन् २०
परमा प्रीतिर्दर्शिता परमसौहृदं च दर्शितं एवमनुवादादेवोद्योगकरणं गम्यते १६ काशिदेशभवः काशेयः पुर्याः भगवान्पुरीं व्रज
जेति १७ उरोगतं यथा तथा निरंतरं गाढं पर्यष्वजत १८ तदानन्तरमर्थः १९ २०

189 प्रहृष्टमनसिनेकपातसंख्यास्वहृष्टपृथिवीपतिदर्शनजसंतोषात्महाशुः भवंतां तेजसा अत्युग्रनिश्चलनयास्थिता प्रीतिर्वेता सुनरागस्यानुभवयोगप
तया परिरक्षितामपि भवद्भिः सद्गुणमालोच्यत भवतामपि प्रीतिः किं तस्वाय सत्त्वभावेनैव तत्पाशयः २१ अक्रमेवाधिस्पष्टयन्तधर्मस्त्वे २२ राव
णो हत इति शेषः भवंतश्च समानीतामिलिताः एवं देवा अश्वता क्रेणानुभवा सम्पन्न इति शेषः २४ हतशात्रवं हतशत्रुसमूहं २८ एतत्तु युप प

ॐ
रा·
टी·
५५

प्रहृष्टमनसो देवा वाक्यमेवाचमधुराक्षरं भवतां प्रीतिरत्युग्रतेजसा परिरक्षिता २१ धर्मश्च नितरां सम्यग्भवता
भवता तदा युष्माकं वानुभावेन तेजसा वमहात्मना २२ हतो दुरात्मा दुर्बुद्धी रावणो दासाधमः हे तं
तु त्रमहेन्द्र भवता तेजसा हतः २३ रावणः सगणो युद्धे सपुत्रामात्यबान्धवः भवन्तश्च समानीता नाम
वते न महात्मना २४ अक्षता जनकरा तस्य कान्तेऽजाऽमनयोऽहूता उद्युक्ता नाव सर्वेषां पार्थिवानां महा
त्मना कालोऽप्यतीतः सुमहा नाम नेऽचयामतः प्रत्यक्षं च राज्ञो नाहर्षेण महता नृपाः २६ दि
ष्ट्या च विजयो रामराज्ये चापि प्रतिष्ठिते दिष्ट्या प्रत्याहृता सीता दिष्ट्या शत्रुः पराजितः २७ एवं ततः प्रसा
काम्मः प्रधानः प्रीतिरुत्तमा यस्मात् विजयिने राम पश्यामो हतशात्रवं २८ एतत्तु युप प्रन्नं च यदस्माभिस्त
प्रशंस से प्रशंसाहंतनागीमः प्रशंसाव क्रमेदृशी ग्रापच्छामो गामिस्यामो हृदिस्यातः सदा भवान्

नसंकललोकमनोरमणात्मादितिभावः प्रशंसार्हं सकललोकमनोरमणात्मादितिभावः प्रशंसार्हं सकललोकप्रशंसार्हस्वभावयुक्तः ईदृशी
भवदुक्तप्रशंसा जातीयप्रशंसा वदुनजानीमोऽन्यस्यामहत्स्वैव २९ यथा सदा नो भवान् हृदयास्थितः एवं वयमपि त्वद्विषया महता प्रीत्या
महत्या हृतानाम नवहृदि यथाव नाम्हेनया ग्रास्माम्ते प्रीतिस्त्वभवत् भूयात् द्वेषेण हृदयस्तनामाभूत् इत्युत्तउक्तिः वाढमित्येवं निरामेणोक्ता

५५

१९० अभिषाभमहत्सुबुवितिप्र्वैणान्वयः पूजितास्तेचेत्यादिनाहुतक्रियानुवादः २२ इत्यार्षेउत्तरकांडेष्टत्रिंशः ३८ अथविसृज्यराजभिः स्वदेश
स्थः प्रेषितोपहारग्रहः प्रयाताः इतिप्रहृष्टवत् प्रहृष्टाः १ राघवार्थे राघवस्य रणसहायार्थे २ रामरावणमितिरामशत्रुं रावणमित्यर्थः अथम

भवेद्युतेमहाराजप्रीतिरस्मासुनित्यदा बाढमित्येवराजानोहर्षेणपरमान्विताः ३ ऊचुः प्रांजलयस्स
र्वेराघवंगमनोत्सुकाः पूजितास्तेचरामेणाजग्मुर्देशान्स्वकान्स्वकान् २२ इत्यार्षेउत्तरकांडे सर्गः ३८
तेप्रयाताः महात्मानः पार्थिवास्तेप्रहृष्टवत् गजवाजिसहस्रौघाः कंपयंतोवसुंधरां १ अक्षौहिण्यो
हितत्रासन्राघवार्थेसमुद्यताः भरतस्याज्ञयानेकाः प्रहृष्टबलवाहनाः २ ऊचुस्तेचमहीपालाबल
दर्पसमन्विताः नरामरावणंयुद्धेपश्यामः पुरतः स्थितं ३ भरतेनवयंपश्चात्समानीतानिरर्थकं ह
ताहिराक्षसाः क्षिप्रंपार्थिवैस्स्यान्नसंशयः ४ रामस्यबाहुवीर्येणरक्षितालक्ष्मणस्यच सुखंपारेसमुद्र
स्ययुध्येमविगतज्वराः ५ एताश्चान्याश्चराजानः ---------- कथयंतः स्वराज्यानिजग्मुर्हर्षसम
न्विताः स्वानिराज्यानिमुख्यानिऋद्धानिमुदितानिच समृद्धधनधान्यानिपूर्णानिवसुमंतिच ७
यथापुराणिगत्वाते रत्नानिविविधानिच रामस्यप्रियकामार्थमुपहारंनृपादधुः ८ अथान्यानिचरत्ना

पदस्त्रोपेसमासः १ पश्चाद्रामयानेनरंपार्थिवैर्हताः स्युः यदिहर्षेनीताः स्मइतिशेषः ४ उक्तानिमुराजानिभृत्यविशिनष्टिस्वानीत्यादिस
स्यानिप्रसिद्धानिधनेजीवदृपं वसुमतिमहानिधिमति ७ यथापुराणियथापूर्वंमदत्तनिभिरोस्तथापुराणिगत्वाप्रियकामार्थं इष्टकामार्थंदं अन

ॐ. (१) अजाविकिंविधाष्टचर्मनन् १० शिरोभिःकरोभिः किरीटकुंडलादीनीभुजेष्वथारणं १५ अंगमारोप्यवालाविवेतिशेषः अनेनभगवनास्व
रा०उ० माणिमुक्ताप्रवालांस्तदासोहंरूपसंमताः अजाकिंचंचविविधरथांस्तविविधावहं भरतेलक्ष्मण
टी० श्चैवशत्रुघ्नश्चमहाबलः आदायतानिरत्नानिस्वांपुरींनगरागताः आगास्येचपुरीरम्यामयोध्यांर
५६ घुषर्भः तानिरत्नानिविचित्राणिरामायसमुपानयन् १२ प्रतिगृह्यचतत्सर्वंरामःप्रीतिसमन्वितः सु
ग्रीवायददौराजमहात्माकृतकर्मणे १३ विभीषणायचददौतथान्येभ्योपिराघवः राक्षसेभ्यःक
पिभ्यश्चयैर्वृतोजयमाप्तवान् १४ तेसर्वेरामदत्तानिरत्नानिकपिराक्षसाः शिरोभिर्धारयामासु
र्भुजेषुचमहाबलाः हनुमंतंचनृपतेरिक्ष्वाकूणांमहारथः अंगदंचमहाबाहोमंकमारोप्यवीर्यवा
न् रामःकमलपत्राक्षःसुग्रीवमिदमब्रवीत् अंगदस्तेसुपुत्रोयंमंत्रीचाप्यनिलात्मजः सुग्रीवमं
त्रितेयुक्तौममचापिहितेरतौ अर्हतोविविधांपूजांत्वत्कृतेवैहरीश्वर इत्युक्त्वाव्यवमुच्यागात्रभूष
णानिमहायशाः सबबंधमहार्हाणितदांगदहनूमतो आभाष्यचमहावीर्यान्राघवोयूथपर्षभा
न् नीलंनलंकेसरिणंकुमुदंगंधमादनं २० सुषेणंपनसंवीरंमैंदंद्विविदमेवच जांबवंतंगवा
लवतिवंधूम्रमेवच २१

सनिरत्नित्यायवलनेतेम्परवंस्तचितं १९१० संचितेमंत्रम् १८ १५ २०२१

१९२ सांमानिवेयसंभजनेरतिपोषः २९ एवंतेषामितिवसतेभिषिक्तेनरामेणसानंतरंविशेषसत्कारप्रामोशिशिरःशिशिरर्तुर्हेमंतेथाद्वितीयोमासःस
र्वमतरत्युक्त्यासंवत्सरपर्यंतंतेवानरामसमीपेवासउक्तः इतितीर्थाद्यः वसंतोधिकमासस्सगणनयामानमानप्राप्तिहाक्समपदेयाथ्याश
वेयोनतेश्चवतडुमरगुक्तपद्येवाभिषेकः साग्रोमासस्मनेनकार्तिकान्नाश्चितिरक्तानतः सशिशिरोद्वितीयोमासोगतहेमंतशिशिरोऽत्र

वलिमुखंविभ्रजंसंमांहंवदंचमहावले दरीमुखंदधिमुखंवमिंद्रजानुंचयूथपं २२ मधुरंश्लक्ष्णयावाचाते
नाभ्यामापिबन्निव सुहृदोमेभवंतश्चशरीरंभ्रातरस्तथा २३ युष्माभिरुद्धृतश्चाहंव्यसनात्काननौकसः
धन्योराजाचसुग्रीवोभवद्भिःसुहृदांवरैः २४ एवमुक्त्वाददौतेभ्योभूषणानियथार्हतः वज्राणिचम
हार्हाणिसस्वजेचनरर्षभः २५ तेपिबंतःसुगंधीनिमधूनिमधुपिंगलाः मांसानिचसुमृष्टानिमूला
निचफलानिच २६ एवंतेषांनिवसतांमासःसाग्रोययौतदा मुहूर्तमिवतेसर्वेरामभक्त्याचमेनिरे २७
रामोपिरेमेतैःसार्धंवानरैःकामरूपिभिः राक्षसैश्चमहावीर्यैऋक्षैश्चैवमहाबलैः २८ एवंतेषांय
योमासोद्वितीयःशिशिरःसुखं वानराणांप्रहृष्टानांराक्षसानांचसर्वशः २९ इक्ष्वाकुनगरेरम्येप
रांप्रीतिमुपासतां रामस्यप्रीतिकरणैःकालस्तेषांसुखंययौ ३०

र्धंशरद्वनतत्रवासइतिपंचमासपर्यंतंतत्रवासइतिममभाति सर्वकांडेतेसंक्षेपेणोक्तस्यैवार्थस्यात्रकांडेविस्तरेणोक्तिरितिबोध्यं एवंतेषामि
तिभरताद्यानीतविशेषसत्कारप्राप्तिपर्यंतंनिवसतांतेषांमासाग्रः पंचषड्दिवाकामासागतः २७ २८ २९ प्रीतिकरणैःसंमाननैः ३०

उ०
रा०
टी०
९२

दार्ढ्यायस्पष्टमाह अप्रविष्टं त्वेत्यादि २९ यदि त्वेवमकरिष्याकृतमनुष्ठितं भवति तदावश्यं विनाशमुपयास्यति ३० विपर्ययः
परिहारः ननु किमनेन निर्बंधेन बाणेन शूलं छित्वा तमपि हनिष्यामि तत्राह श्रीमत इति कृतं शूलमाहात्म्यं दुरतिक्रमं अतिक्र
मितमशक्यं शक्तावपनुविनं चेत्यर्थः ईश्वरकृतमर्यादापालनार्थमेवास्मदवनादादिति भावः ३१ इत्यार्षे त्रिषष्टितमः सर्गः ६३ १६२

266 पृथ्वशात्रुघ्नस्यानेपवमिति प्रशस्यस्नता ११ श्रुतं तस्य नगरमध्यवर्तिन्यो या आपणवीथ्यो वीथिस्थावाणिजः नानाविधैः पण्यैः क्रयविक्रयार्हद्रव्यै
रुपशोभिताः युक्ता अनुगच्छंतिनानावर्णोपशोभिता इति पाठे नानावर्णैः ब्राह्मणादिभिः उपशोभिता इत्यर्थः २ निरुक्तकः पण्यपतिपाठेप
वर्युक्तः नटाः वाक्यार्थाभिनयकर्तारः नर्तकाः पदार्थाभिनयकर्तारः ३ सुवर्णस्य उत्कृष्टवर्णस्य निष्पन्नं लक्षमित्येके दशलक्षमित्यन्ये प
र्याप्तमयनवाहनः जीवनपर्याप्तधनः युद्धपर्याप्तवाहन इत्यर्थः वृलेसम्मतेदृष्टंश्रुतपवनमयानुहृतेयथाभवतितथाकुरुवेतनादिप्रदा

एवमुक्त्वा च काकुत्स्थं प्रासादस्थं पुनः पुनः पुनरेवापरं वाक्यमुवाच रघुनंदन १ इमां तु सह हस्ता
ग्रीवत्वारिपुरुषर्षभ रथानां हि सहस्रेव गजानां शतमुत्तमे २ श्रुतं रायणवीथ्यश्च नानापण्योप
शोभिता अनुगच्छंतु काकुत्स्थं तथैव नटनर्तकाः ३ हिरण्यस्य सुवर्णस्य निष्पन्नं पुरुषर्षभ आदाय
गच्छ त्वं तु त्वं पर्याप्तधनवाहनः ४ वलं च सम्मतं वीरस्य दृष्टपुष्टमनुव्रजते संभाषासंप्रदानेन रंजयस्व तं
नेतेम न तस्य र्थास्तत्र तिष्ठंति न दाराः न च बांधवाः सुप्रीतो भस्तव गत्वयत्र तिष्ठति राघव ६ अतोऽस्य
इज्यन्तां कोणि प्रस्थाप्य महतीं चमूं एकः एव मनुः पाणिगृच्छतं मधुनो वने ७
नेनेत्यर्थः किं च संभाषायाः सम्यग्वचनस्य संप्रदानेन न त्याग रंजयस्व ५ किमेवं वलादरेण तत्राह न तस्यार्था इति यतस्तिष्ठ संकटे भ्रतपाःति
ष्ठंति तत्र आर्थादयो न तिष्ठंतीत्यनेन सर्वथा आदरताव्याप्त इत्यर्थः नतु किं सेनया एक एव तीव्र हि लवणेन योत्स्यामि नेत्यत इति अतोऽयोध्याया इदा
नीमेव महतीं चमूं प्रस्थाप्य एक एव त्वं मधुनो वने मधोर्वनं गच्छ अयंभावः सुखेन जाह्नवीतरणाय ग्रीष्मकाले एव प्रस्थापय जाह्नवी
मुत्तीर्य किंचित्कालं तत्र स्थित्वा तत्रैव तहुत्तं स्थाप्य स्वयमेक एव मधुवनं प्राप्य वर्षाप्रादुर्भावेलवणं न हीति ८

श्री
रा॰उ॰
टी॰
१२५

267 तदेवाह यथेति अशंकितं त्वदागमनशंकारहितं तेन तथा गच्छेः ८ तस्य लवणस्यान्योऽपि शंकितत्वात् दुर्योधकत्वातिविक्रमस्तत्र नीत्वा सेतत्रूपपादयति
दर्शनमिति युद्धाकांक्षी समायातीति तत्कर्तृकज्ञानविषयो भवेदित्यर्थः ९ वसंतोपस्थितस्यापि युद्धकालीनायमित्याह स इति वर्षारात्रे वर्षाका
ले वर्षास्वकेऽपि युद्धार्थं न युक्तं तरतिनिर्भयोनिःसूल एवचरमतः स एवास्य वध्यकाल इतिभावः ९ तर्हि नेदानीं गंतव्यमित्याशंक्य स्वहेशे

यथा त्वां न प्रजानाति गच्छंतं युद्धकांक्षिणं लवणस्तु महाबाहो तथा गच्छेरशंकितः ८ न तस्य मृत्यु
रन्योस्ति कश्चिद्धि पुरुषर्षभ दर्शनं योऽभिगच्छेत स वध्यो लवणेन हि स ग्रीष्मे व्यपयाते तु वर्षारात्र उ
पागते हन्यास्त्वं लवणं सौम्य स हि कालोस्य दुर्मतेः १० महर्षींस्तु पुरस्कृत्य प्रयांतु तव सैनिकाः य
था ग्रीष्मावशेषेण तरेयुर्जाह्नवीजलं ततः स्थाप्य बलं सर्वं नदीतीरे समाहितः अग्रतो धनुषा सार्धं गच्छ त्वं
लघुविक्रमः एवमुक्तस्तु रामेण शत्रुघ्नस्तान्महाबलान् सेनामुख्यान्समानीय ततो वाक्यमुवाच ह एते
वो गणिता वासा यत्र यत्र निवत्स्यथ स्थातव्यं चाविरोधेन यथा बाधा न कस्यचित् तथा तांस्तु समाज्ञाप्य प्र
स्थाप्य च महद्बलं कौसल्यां च सुमित्रां च कैकेयीं चाभ्यवादयत् १५

कार्यांतरस्याप्यर्थमेव प्रथमतः शनैः सेनामात्रगमनं कार्यमित्याह महर्षीनिति ११ तत्र जाह्नवीपारतीरे अग्रतः अतः परं सृते मार्गे धनुषा
सार्धं नाम्नेन बलेनेत्यर्थः १२ एते प्रस्थितेवायुष्मा वासा गणिताः एवं सति यत्र वासे वत्स्यथ तत्र तत्राविरोधेन स्थातव्यं तदेवाह यथेति दुरखं
सैनिकाय इति वाक्यं १४ अनेन केवलसेनैव प्रस्थिता शत्रुघ्नस्तु पश्चादयोध्यात एव गमिष्यतीति ज्ञायते १५

१२५

268 इतिरामायणेउत्तरकांडेचतुःषष्टितमःसर्गः ६४ अथसेनाप्रस्थानोत्तरंमासमात्रमयोध्यायामुषित्वापश्चादेकाकिनोगच्छतः शत्रुघ्नस्यमार्गेव
रामंप्रदक्षिणीकृत्यशिरसाभिप्रणम्यच लक्ष्मणंभरतंचैवप्रणिपत्यकृतांजलिः पुरोहितंवसिष्ठं
चशत्रुघ्नःप्रयतात्मवान् रामेणचाभ्यनुज्ञातःशत्रुघ्नःशत्रुतापनः प्रदक्षिणमथोकृत्वानिर्जगाम
समहाबलः नियोज्यसेनामथसोऽग्रतस्तदागजेंद्रवाजिप्रवरौघसंकुला उवाससमानःसनृपै
र्नृपात्मजः प्रतिप्रयातोरघुवंशवर्धनः१९ इत्यार्षेउत्तरकांडेचतुःषष्टितमः६४ प्रस्थाप्यचबलंसर्वं
मासमात्रोषितःपथि पकएवाशुशत्रुघ्नोजगामत्वरितंतदा १ द्विरात्रमंतरेशूरउष्यराघवनंदनः
वाल्मीकेराश्रमंपुण्यमगच्छद्वासमुत्तमं सोऽभिवाद्यमहात्मानंवाल्मीकिंमुनिसत्तमं कृ
तांजलिरथोभूत्वावाक्यमेतदुवाचह २ भगवन्वस्तुमिच्छामिगुरोःकृत्यादिहागतः श्वःप्रभाते
गमिष्यामिप्रतीचींदिशंदारुणां शत्रुघ्नस्यवचःश्रुत्वाप्रहस्यमुनिपुंगवः प्रत्युवाचमहात्मा
नंस्वागतंतेमहायशाः स्वमाश्रममिदंसौम्यराघवाणांकुलस्यवै आसनंपाद्यमर्घ्यंचनिर्विशं
कःप्रतीच्छमे प्रतिगृह्यतदापूजांफलमूलंचभोजनं भक्षयामासकाकुत्स्थस्तृप्तिंचपरमांगतः
वाल्मीक्याश्रमप्राप्तिःप्रस्थाप्येतिसमासमात्रोषि समुक्त्वाफलमूलंचमहर्षिंतमुवाच पूर्वायज्ञविभूतीयंक
तःप्रयोध्यायामितिशेषः पएककएवासहाय एवजगाम २ दारुणांलवणेनाधिष्ठितत्वात् ४ इत्यमाश्रमंराघवाणांकुलस्यसमे

श्रीरामायणउत्तरकांडे ८

उत्तरकांड ६०८

ओ० 269 पूर्वोयज्ञविभूतीयमित्यार्षः संधिः आश्रमसमीपतः पूर्वापूर्वप्रदेशे दृश्यमानापुरातनी चेयं यज्ञविभूतिर्यूपादियज्ञोपकरणसमृद्धिः कस्य यज्ञपानस्येदमा
रा० उ० यतनं बभूवतल्लक्षण १० वंमृगयमाणौमहस्रशेद्रस्यांते ।। निर्मितं तत्कृतं वने वहद्दष्ट्वा अनुकर्षः १२ तस्य हतस्य सहायस्य सहायभूतमात्मानं निरीक्ष्यमाणं तं रा
टी० तत्रस्य भाषितं श्रुत्वा वाल्मीकिर्वाक्यमब्रवीत् शृणुष्व राम यस्येदं बभूवायतनं पुरा ९ युष्माकं पूर्व
१२५ को राजा सुदासस्य महीपतेः पुत्रो वीर्यसहो नाम वीर्यवानतिधार्मिकः स बाल एव सौदासो मृगया
मुपचक्रमे चंच्रूयमाणं ददृशे स शूरो राक्षसद्वयं ।। शार्दूलरूपिणौ घोरौ मृगान्बहुसहस्रशः भक्षमा
णावसंतुष्टौ पर्याप्तिं नैव जग्मतुः स तु तौ राक्षसौ दृष्ट्वा निर्मृगं च वनं कृतं क्रोधेन महता विष्टो जघानै
कं महेषुणा विनिपातितमेकं तु सौदासः पुरुषर्षभः विज्वरो विगतामर्षो हतं रक्षोह्यवेक्षत १४
निरीक्ष्यमाणं तं दृष्ट्वा सहायं तस्य राक्षसः संतापमकरोद्घोरं सौदासं चेदमब्रवीत् १५ यस्मादनपराधं
त्वं सहायं मम जघ्निवान् तस्मात्तवापि पापिष्ठ प्रदास्यामि प्रतिक्रियां एवमुक्त्वा तु तद्रक्षस्तत्रैवांत
र्धीयत कालपर्याययोगेन राजा मित्रसहोऽभवत् राजापि यजते यज्ञमस्याश्रमसमीपतः अश्वमे
धं महायज्ञं तं वसिष्ठोऽभ्यपालयत् तत्र यज्ञो महानासीद्बहुवर्षगणायुतः समृद्धः परया लक्ष्म्या दैव
यज्ञसमोऽभवत् १९

ज्ञानं दृष्ट्वा संतापमकरोत् १५ कालपर्याययोगेन बहुकालानंतरं प्राप्य राजा यज्ञं यजत प्रापककर्मवशेनमि
त्रसहो राजा भवत् वीर्यसहस्यैव मित्रसह इति नामांतरं १७ अस्याश्रमेति लमषधीकमलाश्रमस्य समीपे ता राजा यज्ञं यजते १८ गणायुतैः १२५

संभ्रान्तमानसः श्रुभदितिशेषः पावकान्तरयेतिशेषः सूदयेषमितितत्रमहानसेसूदांतरवेषंगदीत्वामुख्यसूदेनपाकसमयेमानुषंमां

प्रयावसानेयज्ञस्यपूर्ववैरमनुस्मरन् वसिष्ठरूपीराजानमितिहोवाचराक्षसः २० ग्रयपयज्ञावसाने
तेसामिषभोजनंमम दीयतांमितिशीघ्रंवैनात्रकार्याविचारणा तच्छ्रुत्वाथमाहूतेवाक्यरक्षसावष्टु
रूपिणा महानसंस्कारकुशलानुवाचसपृथिवीपतिः हविष्यंसामिषंस्वादुयथाभवतिभोजने तथा
कुरुतशीघ्रंवैपरितस्थेयथागुरुः शासनात्पार्थिवेंद्रस्यसूदःसंभ्रांतमानसः तच्चरक्षःप्रनस्तत्रसूद
वेषमथाकरोत् २४ समानषमथोमांसंपार्थिवायमवेदयत् इमंस्वादुहविष्यंचसामिषंचानमा
हृतं सभोजनेवसिष्ठायपत्न्यासार्धमुपाहरत् मदयंत्यानरश्रेष्ठसामिषंरक्षसाहृतं ज्ञात्वात
दामिषविप्रोमानुषंभोजनागतं क्रोधेनमहताविष्टोव्याहर्तुमुपचक्रमे २० यस्मात्वंभोजनंराज
न्ममैतद्दातुमिच्छसि तस्माद्भोजनमेतत्तेभविष्यतिनसंशयः २८ ततःक्रुद्धस्तुसौदासस्तोयंजग्राह
पाणिना वसिष्ठशापंत्वंशाक्तुंदेवतत्संप्ररोधसं मारमेमार्यावैननमवारयत् राजन्प्रभुर्यतोस्माकं
वसिष्ठोभगवान्दोषः प्रतिशापेनशाकस्त्वंदेवतत्संप्ररोधसं २९ तेनासराजसोपादौतदाकल्मषतां
गतौ तदाप्रभृतिराजासौसौदासःसुमहायशाः ततःक्रोधसमं

संभ्रांतिदितिशेषः प्रयोनंतरंस्पूदवेषोराक्षसःपार्थिवा
यमानुषंमांसंपक्वंमवेदयत् इदमन्नंसिद्धमितिनिवेदनप्रकारः २५ राज्ञापिसामिषंमानुष्यमयमानुषंतन्न विद्यासिम्यैवविज्ञाःयपत्न्यासार्धंवसिष्ठा

[illegible] ११

तोयंतेजोवलसमन्वितं ब्रह्मर्जयतनयमात्मानतःपा

योपहारन् २९ मानुषामिषंभोजनंज्ञात्वाभोजनात्सर्वपो
नेतिभावः २० रतद्भोजनंमानुषभोजनं २९

271 वसिष्ठं कुर्वंतं वसिष्ठरूपिणा वसिष्ठेन यदुक्तं सामिषभोजनप्रार्थनं ११ ततस्तस्माद्विकृतं कृतमिति शेषः एतद्राजवचनं श्रुत्वा पुनः वसिष्ठः प्रो
ॐ वाच १४ द्वादशवर्षाणि कालो व्यतीतस्तस्मादिति शेषः अतीतं स्वकं राजन् त्वं न शापभोगकाले स्मरिष्यसि १९ कल्माषपाद इति मित्रसहस्यैव नामान्त

रा॰उ॰ कल्माषपादः संवृत्तः ख्यातश्चैव तथा नृपः स राजा सह पत्न्या वै प्रणिपत्य मुहुर्मुहुः पुनर्वसिष्ठं प्रोवा
टी॰ च यदुक्तं ब्रह्मरूपिणा तच्छ्रुत्वा पार्थिवेन्द्रस्य रक्षसा विकृतं वचनं १४ पुनः प्रोवाच राजानं वसिष्ठः पुरु
१२९ षर्षभम् मया रोषपरीतेन यदिदं व्याहृतं वचः नैतच्छक्यं वृथा कर्तुं प्रदास्यामि च ते वरं १५ कालो द्वाद
शवर्षाणि शापस्यान्तो भविष्यति मत्प्रसादाच्च राजेन्द्र अतीतं न स्मरिष्यसि एवं स राजा तं शापमुपभु
ज्यारिसूदन प्रतिलोमं पुनः राज्यं प्रजाश्चैवान्वपालयत् तस्य कल्माषपादस्य यज्ञस्यायतनं शुभं
आश्रमस्य समीपेऽस्मिन् यन्मां पृच्छसि राघव तस्य तां पार्थिवेन्द्रस्य कथां श्रुत्वा सुदारुणां विवेश पर्ण
शालायां महर्षिमभिवाद्य च १९ इत्यार्षे उत्तरकाण्डे पञ्चषष्टितमः ६५ यामेव रात्रिं शत्रुघ्नः पर्णशाला
समाविशत् तामेव रात्रिं सीतापि प्रसूता दारकद्वयं १

रं १८ विवेश पर्णशालामिति शेषः १९ इत्यार्षे रामायणे उत्तरकाण्डे पञ्चषष्टितमः ६५ अथ शत्रुघ्नस्य तद्दिने एव सीताप्रसवज्ञानपूर्वकं ऋषि
भिः सह मधुवनप्रस्थानं यामेवेत्यस्यां रात्र्यां प्रसूतवती १ ॥

272 मुनिदारकाः मुनिपुत्राः २ भूतविनाशिनीं रक्षां बालग्रहविनाशिनीं ३ देवपुत्रौ महौजसौ इत्यत्र ददर्शेति शेषः ४ भूतघ्नीं रक्षोविनाशिनीं च रक्षामकरोदित्य
न्वयः तत्प्रकारमाह कुशमुष्टिमिति कुशमुष्टिं लवं चोपादाय रक्षां प्रददौ लूनकुशानामग्रभागः कुशमुष्टिरित्युच्यते तेषामधोभागो लव इति तत्र कतिपय
साग्रकुशान्गृहीत्वा मध्ये छित्वा छिन्नानदग्राधोभागाभ्यां क्रमाज्ज्येष्ठकनिष्ठयोः प्रमार्जनफलकं तदुपरि तादानेत्रीणां हस्ते इति बोध्यं ६ निर्मा

ततोर्धरात्रसमये बालका मुनिदारकाः वाल्मीकेः प्रियमाचख्युः सीतायाः प्रसवं शुभं २ भगवन्राम
पत्नी सा प्रसूता दारकाद्वयं ततो रक्षां महातेजाः कुरु भूतविनाशिनीं ३ तेषां तद्वचनं श्रुत्वा महर्षिः
समुपागमत् बालचंद्रप्रतीकाशौ देवपुत्रौ महौजसौ ४ जगाम तत्र हृष्टात्मा ददर्श च कुमारकौ भू
तघ्नीं चाकरोत्ताभ्यां रक्षां रक्षोविनाशिनी ५ कुशमुष्टिमुपादाय लवं चैव तु स द्विजः वाल्मीकिः प्रददौ ता
भ्यां रक्षां भूतविनाशिनी ६ यस्तयोः पूर्वजो जातः स कुशैर्मंत्रसत्कृतैः निर्मार्जनीयस्तु तदा कुश इत्यस्य
नाम तत् ७ यश्चावरो भवेत्ताभ्यां लवेन सुसमाहितः निर्मार्जनीयो वृद्धाभिर्लवेति च स नामतः एवं कुश
लवौ नाम्ना तावुभौ यमजातकौ मत्कृताभ्यां च नामभ्यां ख्यातियुक्तौ भविष्यतः ९ ते रक्षां जगृहुस्तां
च मुनिहस्तात्समाहिताः अकुर्वंश्च ततो रक्षां तां विगतकल्मषाः १०

निर्मार्जनीयो निर्मार्जनार्हो यतो जातस्ततोऽस्य कुश इति नाम भविष्यतीत्यर्थः ७ ताभ्यां तयोर्मध्ये इत्यर्थः लवलेन कुशाधोभागमुष्टिना वृद्धाभि
निर्मार्जनीयः सूतीगृहे स्त्रीणां प्रवेशाभावाद्वृद्धाभिरिति लव इति नामतो भविष्यतेति शेषः जातकर्मण एकादशदिवसे कर्तव्यत्वेन तन्नाम
करणस्यापीति भविष्यतीति शेषश्शरणं ८ यमजातकौ यमलौ ९ समाहिता वृद्धास्तां मुनिहस्तात् मुनिना दीयमानां रक्षां जगृहुः १०

ऊँ॰ रा॰ वाटी॰ १३०

273 गोत्रनाम च गोत्रं नाम च वनेचरनाम्नः कथ्यमानं तेन श्रवणं रामसंकीर्तिनं भगवत्रामपत्नी सा समसूतेति मुनिदारकवचनश्रवणात्ततस्तत्र
वरमानंतरं पर्णशालां सीतायाः प्रसवपर्णशालां गत्वा मातर्दिष्ट्या देवयोगेन तेऽपत्ये जन्मेति शेषः इत्यब्रवीत् इत्यर्थः शत्रुघ्नः पर्णशालांग
तो वाल्मीकिर्दिष्ट्यादिष्ट्येति वाब्रवीत् इति पाठे स्वपर्णशालास्थः सर्वमिदं कृत्वा स्वानन्दमेव भाग्यं भाग्यमित्यब्रवीदित्यर्थः प्रायपाठेऽपि वाल्मी
किः तत्र पर्णशालां पूर्णामेव गत्वा स्थितस्ततः श्रवणानंतरं मातर्भार्गवनंदन तव पुत्रजन्मेति स्वानन्दमेवाब्रवीदित्यथवा कथाकः रामानुमावि

तथा तो क्रियमाणं च वृद्धाभिर्गोत्रनाम च संकीर्तनं च रामस्य सीतायाः प्रसवौ शुभौ ॥ अर्धरात्रे तु शत्रु
घ्नः शुश्राव सुमहत्प्रियं पर्णशालां ततो गत्वा मातर्दिष्ट्येति चाब्रवीत् तदा तस्य प्रहृष्टस्य शत्रुघ्नस्य
महात्मनः व्यतीता वार्षिकी रात्रिः श्रावणी लघुविक्रमा प्रभाते सुमहावीर्यः कृत्वा पौर्वाह्णिकीं क्रि
यां मुनिं प्राञ्जलिरामन्त्र्य ययौ पश्चान्मुखः पुनः स गत्वा यमुनातीरं सप्तरात्रोषितः पथि ऋषीणां
पुण्यकीर्तीनामाश्रमे वासमभ्यगात् स तत्र मुनिभिः सार्धं भार्गवप्रमुखैर्नृपः कथाभिरभिरूपाभि
र्वासं चक्रे महायशाः १७ स काञ्चनाद्यैर्मुनिभिः समेतै रघुप्रवीरो रजनीं तदानीं कथाप्रकारैर्बहुभिर्म
हात्मा विरामयामास नरेन्द्रसूनुः १८ इत्यार्षे उत्तरकाण्डे षट्षष्टितमः सर्गः ६६

रामतपःकसमाधानस्यानेनोचितानादितीर्थः १२ वार्षिकी वर्षाकालिकी तत्रापि श्रावणी श्रवणमासीया दीर्घतरापि लघुविक्रमाशीघ्रगमना
व्यतीता १३ मुनिं वाल्मीकिं १४ स तत्र यमुनातीरे इति कतकस्तत्सर्वापरसंदर्भविरुद्धं १७ स काञ्चनाद्यैरिति काञ्चनैर्ज्वलनवननामो
तरभार्गवाद्यैरिति पाठान्तरं १८ इत्यार्षे उत्तरकाण्डे षट्षष्टितमः सर्गः ६६

274 अथरात्र्यामिति प्रवृत्तायां जातायां लवणस्य शूलस्य बलं तत्पूर्वं शूलेन विनाशिता अस्य के इति प्रश्ने त्रिभिः संबंधः १ अस्य शूलस्य लवणस्य चासंख्येयानि कर्मा
णि यानि संति तेनेषु इक्ष्वाकुवंशप्रभवे मांधातरि यत् महत् कर्म अस्य वृत्तं तच्छृणुष्व ४ शक्रस्यार्धासनेनार्धराज्येन च युक्तः पार्थिवो राजा भूत्वा सुरग

अथरात्र्यांप्रवृत्तायांशत्रुघ्नोभृगुनंदनं पप्रच्छच्यवनंविप्रंलवणस्ययथाबलं १ शूलस्यवचनेव
ह्मनकेचपूर्वंविनाशिता अनेनशूलमुख्येनद्वंद्वयुद्धमुपागताः २ तस्यतद्वचनंश्रुत्वाशत्रुघ्नस्यम
हात्मनः प्रत्युवाचमहातेजाश्च्यवनोरघुनंदनं ३ असंख्येयानिकर्माणियान्यस्यरघुनंदन इक्ष्वाकु
वंशप्रभवेयद्वृत्तंतच्छृणुष्वमे ४ अयोध्यायांपुराराजायुवनाश्वसुतोबली मांधाताइतिविख्यात
स्त्रिषुलोकेषुवीर्यवान् ५ सकृत्वापृथिवींकृत्स्नांशासनेपृथिवीपतिः सुरलोकमितोजेतुमुद्योग
मकरोन्नृपः इंद्रस्यचभयंतीव्रंसुराणांचमहात्मनां मांधातरिकृतोद्योगेदेवलोकजिगीषया अ
र्धासनेनशक्रस्यराज्यार्धेनचपार्थिवः वंद्यमानःसुरगणैःप्रतिज्ञामध्यरोहत तस्यपापमभिप्रायं
विदित्वापाकशासनः सांत्वपूर्वमिदंवाक्यमुवाचयुवनाश्वजं राजात्वंमानुषेलोकेनतावत्पुरुष
र्षभ अकृत्वापृथिवींवश्यांदेवराज्यमिहेच्छसि १० यदिवीरसमग्राभेमेदिनीनिखिलावशे देवरा
ज्यंकुरुष्वेहसभृत्यबलवाहनः ॥

देवराज्यंकुरुष ॥

गणैर्वंद्यमानः स्यामस्येतिप्रतिज्ञामाकृत्वादिवमध्यारोहत् तराजेत्यर्थः ९ तावत्प्रथमं
मनुष्य एवलोकेसर्वात्मनाराजासि सत्वंपृथिवीमेववश्यामकृत्वाकथमिहदेवराज्यमिच्छसि १० यदिसमग्रामेदिनीतेतववशेभविष्यति तदा

275 नैनेसंज्ञातं तेग्राज्ञामित्यर्थः १९ वितायमानोणे विपत्तं वंजवाणे १९ अथाक्रतत् लवणं प्रति स्वविजयसंदेह निहन्तये आहस्म: प्रभाते इति: इतिसमम: ८०

इदमेवं ब्रुवाणं तं तथा तां वाक्यमब्रवीत् क्रमेणाऽप्रतिहतशासने पृथिवीतले १२ तमब्रवाचसहस्राते
लवणो नाम राक्षस: मधुपुत्रो मधुवने नतेजो ऽकुरुते नद्य ततश्च ताविप्रियं चोरं सदसातेणभा
षितं श्रीरितो वा न्न खोराजा नाव्याहतेनपाणाक्रद ग्रामं अतसहस्रातं स्थाया किंचिदवान्त्र खश्र
देवावगच्छीमानिमं लोके महेश्वरः १७ सकृत्वा रूद्ध्येमर्षमम्भस्य वल वाहनः ग्राजगाम मथोः ९
वे वणेकतमस्दिम संकातमाणाल लवणापुहाय पुरुषर्षभः हतं मेषेषयामास सकाणं लवणस्य स
मागतात्रिपियापणाहवहनि मधुनःस्रुते वदंतमेवं तेहन्ते भक्षयामास राक्षसस्यः १८ विलयमानो
नेतरा ज्ञाको यममन्वितः ग्रहीयामासतनहस्तः पारहस्यासमं ततः ततः प्रहस्यतं हस्तः शूलेन ग्राहपा
णिना वधाय मानवं धस्य सम्मोचा युधमनतम तच्छूलं दीप्यमानं तं सभ्स्य वल वाहनं भस्मीकृत्वा
नरर्षभं भोलवणस्यागमत्करं एवं सराजा सुमहान् सबलवाहनः शूलस्य तवलेसोमस्य
प्रमेयम नतम: .. स्य: प्रभाते तं लवणं वधिष्यसि न संशय: प्रगृहीतायुधश्चैव ध्रुवो हि विजय
स्तव लोकानां स्वस्ति चैव स्यात् कृते कर्मणि वे त्वया एतत्ते सर्वमाख्यातं लवणस्य दुरात्मनः शूल
स्य च बल वारंसमप्रमेयं नरर्षभ विनाशश्चैव माधीता व्यत्नेना सबपार्थिवा २५ लव्ध: प्रभाते लवणो १२८

276 अथ प्रातःकाले लवणे निर्गते मधुपुरद्वारं निरुध्य स्थितेन शत्रुघ्नेन मध्याह्ने प्रतिनिहतस्य पुरुषस्याह्वानं कथमिति तेषां वचः श्रुत्वा तस्या
शत्रुघ्नस्य रजनी व्यतीता १ भक्ष्याहारस्याहरणेन प्रचोदितः प्रेरितः २ किमनेन ग्राम्ययुद्धेनेत्यर्थः ५ स्वयमासाद्य आगमनमसह्यं कथमय

कथां कथयतां तेषां जयं चाकाङ्क्षतां शुभा व्यतीता रजनी शीघ्रं शत्रुघ्नस्य महात्मनः १ ततः प्रभाते वि
मले तस्मिन्काले स राक्षसः निर्गतस्तु पुराद्वीरो भक्ष्याहारप्रचोदितः २ एतस्मिन्नन्तरे वीरः शत्रुघ्नो यमु
नां नदीं तीर्त्वा मधुपुरद्वारि धनुष्पाणिरतिष्ठत ३ ततोऽर्धदिवसे प्राप्ते क्रूरकर्मा स राक्षसः आगच्छद्
बहुसाहस्रं प्राणिनां भारमुद्वहन् ४ ततो ददर्श शत्रुघ्नं स्थितं द्वारि धृतायुधम् तमुवाच ततो रक्षः किम
नेन करिष्यसि ५ आहारश्चाप्यसंपूर्णो ममायं पुरुषाधम स्वयं प्रविष्टो यन्मुखं कथमासाद्य दुर्म
ते तस्यैवं भाषमाणस्य हसतश्च मुहुर्मुहुः शत्रुघ्नो वीर्यसंपन्नो रोषादश्रूण्यवासृजत् तस्य रोषाभि
भूतस्य शत्रुघ्नस्य महात्मनः तेजोमया मरीच्यस्तु सर्वगात्रैर्विनिष्पतन् उवाच च सुसंक्रुद्धः शत्रु
घ्नः स निशाचरं योद्धुमिच्छामि दुर्बुद्धे द्वन्द्वयुद्धं त्वया सह ८ पुत्रो दशरथस्याहं भ्राता रामस्य धीमतः शत्रु
घ्नो नाम शत्रुघ्नो वधाकाङ्क्षी तवागतः यस्य मे युद्धकामस्य द्वन्द्वयुद्धं प्रदीयताम् शत्रुस्त्वं सर्वभूतानां न मे
जीवन्गमिष्यसि तस्मिंस्तथा ब्रुवाणे तु राक्षसः प्रहसन्निव प्रत्युवाच नरश्रेष्ठं दिष्ट्या प्राप्तोऽसि दुर्मते

प्रविष्टोऽसि ७ गात्रैर्विनिष्पतन् तद्विनिर्यन्तमरीच्यो मरीचयः ९ मे मजीनोवननगमिष्यसि १२ मम मातृष्वसृभ्रातुः रावणो नाम राक्षसः ततः शूर्प

उ॰
रा॰
टी॰
१३९

277 मयावज्ञातोपूर्वतः कृतास्त्वयं विशेषतः तांनत्समनुवर्षः १५ भूतास्त्रम विषाश्च पूर्वं वर्तमानाश्च पुरुषाधमाः सर्वेपिमेमयानिहताः एकादहनंव
र्तमानेषु अंपूर्विरत्तानां यथा तथा परिभूताश्च मामात्यपरिभवेन परिभूता इति पुष्पाश्च वत्तोकृत्वा इतः पूर्वं मं वर्तमानहता इति भावः १६

तच्चसर्वंमयाख्यातं रावणस्य कुलं त्वय पूर्ववत्तापुरतः कृतामया पूर्वविशेषताः निहताश्चदि
तेमेवं परिभूतास्तृणानतथा भूताश्चैव भविष्याश्च पूर्वं च पुरुषाधमाः १६ तस्यते युद्धकामस्य यु
द्धदास्यामि रमेत तिष्ठस्वच मुहूर्तं तु यावदायुधमानये ईप्सितं यादृशं तन्मे सज्जये यावदायुधं
तमुवाचाशुशत्रुघ्नः कमेजीवन्नाभिमिष्यसि स्वयमेवागतः शत्रुर्नमोक्तव्यः कृतात्मना योहिवि
कृवयाबुद्ध्याप्रसवंशत्रुवेदियेत १९ सहतोमंदबुद्धिः स्याद्यथाकापुरुषस्तथा तस्मात्सदृष्टं कुरुजी
वलोकेपुनः पितैस्त्वांविविधैर्नयामि यमस्यगेहाभिमुखं विहिपापंरिपुं त्रिलोकस्य चराचरस्य २० इत्या
र्षेरामायणेउत्तरकांडेअष्टषष्टितमः सर्गः ६८ तच्छ्रुत्वाभाषितं तस्य शत्रुघ्नस्य महात्मनः क्रोधमा
हारयत्तीव्रंतिष्ठतिष्ठतिचाब्रवीत् पाणौपाणिंसनिष्पिष्य दंतान्कटकटाय्यच लवणोरघुश्रे
ष्ठमाह्वयामासचासकृत् २ तंब्रुवाणंतथावाक्यंलवणंघोरदर्शनं शत्रुघ्नोदेवशत्रुघ्न इदं वचनम

तस्मैतादृशंयादृशमायुधं ममेप्सितं तादृशंयावत्सज्जयेसज्जीकरोमितावत्तिष्ठेति शेषः १८ प्रसरमवकाशः १९ २० इत्यार्षेरामायणेउत्त
रकांडेअष्टषष्टितमः सर्गः ६८ अथलवणः नदीति १ कटकटायकटकटाशब्दवनः कृत्वा २२ १३९

278 वज्रनिभाननाः वज्रायुधसमाग्रभागाः दंष्ट्राः किरणाः ७ स्वसंगेभालिनोगः ५ लक्षांतरंस्थूलमहद्गणायगत्हप्रवेशेशति लक्षावकाशमपि १६
शत्रुघ्नोनतदाजातोयदान्येनिर्जितास्त्वया तदद्यबाणाभिहतोव्रजत्वंयमसादनं ५ ऋषयोप्यद्यपापा
त्मन्मयानिहतंरणे पश्यंतुविप्रविद्वांसस्त्रिदशाश्चरावण ५ त्वयिमद्बाणनिर्दग्धेपतितेद्यनि
शाचरे पुरेजनपदेचापिक्षेममेवभविष्यति ९ अद्यमद्बाहुनिष्क्रांतःशरोवज्रनिभाननः प्रवेक्ष्यतेते
हृदयंपद्ममंशुरिवार्कजः एवमुक्तोमहावृक्षंलवणःक्रोधमूर्छितः शत्रुघ्नोरसिविक्षेपसशाते
शतधाछिन्नत् ८ तद्दृष्ट्वाविफलंकर्मराक्षसःपुनरेवतु पादपान्सुबहून्गृह्यशत्रुघ्नायासृजद्बली
शत्रुघ्नश्चापितेजस्वीदृष्ट्वानापततोबहून् त्रिभिश्चतुर्भिरेकैकंचिच्छेदनतपर्वभिः ९ ततोबाण
मयंवर्षंव्यसृजद्राक्षसोपरि शत्रुघ्नोवीर्यसंपन्नोविव्यथेनसराक्षसः ९ ततःप्रहस्यलवणोवृक्षम
द्यम्यवीर्यवान् शिरस्यभ्यहनच्छूरंस्रस्तांगःसमुमोहवै तस्मिन्निपतितेवीरेहाहाकारोमहानभूत्
ऋषीनांदेवसंघानांगंधर्वाप्सरसांतथा तमवज्ञायतंहत्वाशत्रुघ्नंभुविपातितं रक्षोलब्धांतरमपिन
विवेशस्वमालयं नापिशूलंप्रजग्राहतंदृष्ट्वाभुविपातितं रक्षोलब्धांतरमपितान्भक्षान्समुदावहन्
सहृतोलब्धसंज्ञस्तुपुनस्तस्थौधृतायुधः शत्रुघ्नोवैपुरद्वारिऋषिभिःसंप्रपूजितः ९
प्रस्यंतदिशोदश: स्वतेजसेतिशेषः ९ श्रीरामजीसहायेनमः ९

ॐ· रा॰उ· टी· १४·

279 मेरुवेगाममेरुमंदिरसंनिभं १८ ग्रसंतं रूपे स्वंदनेतिमांगं पवित्रिणां दानवेंद्रमूर्णणामबलेंद्राणां १९ मुनिभिः सहितमिति शेषः पितामहं च तत्र सं
रवव्रह्माणं नेदृष्टाहृष्टपूर्वं नष्कृतवान् लोकानां संक्षयं प्रति लोकक्षयो भवेत् किमिति भयं संमोहः २२ पाशुपतधारितः तेन धृतः समर्थः २४ प

ततो दिव्यमसौघं तेजग्राहशस्मनुमं ज्वलनेनैतेजसाघोरं सर्वयंते दिशोदश १७ वज्राननं वज्रवेगं मे
रुमंदिरसंनिभं ततः पर्वसमं वेषसं युगेष्वपराजितं १८ ग्रसंतं दनोर्दिव्यांगं चारुपुत्रं तपवित्रिणां
दानवेंद्रावलेंद्राणां ग्रसंतां च दारुणं तेदीसमिव कालाग्निं युगांते समुपस्थितं दृष्ट्वा सर्वा
णिभूतानि परित्रासमुपागमन् सदेवासुरगंधर्वं मुनिभिः साप्सरोगणा जगद्धि सर्वमस्वस्थं पि
तामहमुपस्थितं २० उवाच देवदेवेशं वरदं प्रपितामहं देवानां भयसंमोहो लोकानां संक्षयं
प्रति तेषां नहू वर्नेक्षत्वा ब्रह्मा लोकपितामहः भयकारणमावेदे देवानामभयंकरं २१ उवाच
मधुरां वाणीमिंद्राद्यांश्च सर्वदेवताः वधाय लवणस्यातो वाणः पाशुपतो धारितः तेजसा तस्य संमूढाः
सर्वे स्म सत्तमाः एषो पूर्वस्य देवस्य लोककर्तुः सनातनः पारस्ते नामयावत्वायेन वै भयमागतं
एष वै कैटभस्यार्थे मधुनश्च महाशनः २३ सृष्टो महात्मना तेन वधार्थे दैत्ययोस्तयोः एष एव प्रजा
नामति विसृ तेजोमयं शरम् २४ सोऽपूर्वस्येति पूर्वलोककर्तुर्देवस्य एषः शरः आर्षः संधिः २५ तेन भगवतेत्यर्थः तमेवंते
जोमयं शरं एषो विसृजेव व प्रजानां तिन दर्पस्मृतिनात २०

१४·

२८० तेदेवायथापेवेतिग्रुसंथिरार्षः महात्मनस्तस्यविस्मोरोषात्परमयीतन्देवपूर्वाप्राचीनामूर्तिः वध्यमाणंलवणमित्यन्वयः २८ भयंत्यक्ताज

यथापवतन्पूर्वोविस्मोत्तस्यमहात्मनः इतोगछतपश्यध्वंवध्यमानंमहात्मना २८ रामानुजेनवीरेण

लवणंभात्तमोत्तमं तस्यतेदेवदेवस्यनिशम्यवचनंसुराः आजग्मुर्यत्रयुध्येतेशत्रुघ्नलवणावुभौ ते

षिरेदिव्यंमकाणशत्रुकरधारितं ३० दृष्ट्वा सर्वभूतानियुगांतग्निमिवोस्थितं आकाशमाहृतंदृ

ष्ट्वादेवैर्हिरघुनंदन सिंहनादंभृशंकृत्वाददर्शलवणंपुनः आहूतश्चपुनस्तेनशत्रुघ्नेनमहात्मना

लवणःक्रोधसंयुक्तोयुद्धायसमुपस्थितः आकर्णात्सविकृष्याथतद्धनुर्धन्विनांवरः ३३ समुमोच

महाबाणंलवणस्यमहोरसि उरस्तस्यविदार्याशुप्रविवेशरसातलं गत्वारसातलंदिव्यःसमुमो

चमहाबाणं पुनरेवागमत्तूर्णमिक्ष्वाकुकुलनंदन ३५ शत्रुघ्नशरनिर्भिन्नोलवणःसनिशाच

रः पपातसहसाभूमौवज्राहतइवाचलः ३६ तच्चशूलंमहद्दिव्यंहतेलवणराक्षसे पश्यतांस

र्वदेवानांरुद्रस्यवशमन्वगात ३७ एकेषुपातेनभयंनिपात्यलोकत्रयस्यास्यरघुप्रवीरः विनिर्बभावु

द्यतचापबाणस्तमःप्रणुद्येवसहस्ररश्मिः ३८ ततोहिदेवाऋषिपन्नगाश्चप्रपूजिरेत्वप्सरसश्चसर्वाः

दिष्ट्याजयोदाशरथेरवाप्तस्त्यक्त्वाभयंसर्पइवप्रशांतः

दोवामःपर्यटवसर्पसदृशोलवणाश्चप्रशांतः ३९ इत्यार्षेरामायणे ... ४०

[illegible]

उ॰ रा॰ टी॰ १५१

२८१ पृथग्देवप्रसादतो महती प्रतिष्ठा शत्रुघ्नस्य हते रतिः तस्येतव १ मधुरा मनोहरा त्रिवेशं सा पौरजानेषु महाबलसेनानिनिवेशाभूतं महाराज
धानी तं प्राप्नुयात् ५ शूरसेना शूरसेनायस्य सः ६ तां सेनां गंगातीरस्थापितां ७ श्रावणेन श्रावणमासावलेवकेनेन निवेशनं स्थापनं से

हते तु लवणे देवाः सेंद्राः साग्निपुरोगमाः ऊचुः सुमधुरां वाणीं शत्रुघ्नं शत्रुतापनं १ दिष्ट्या ते विज
यो वत्स दिष्ट्या लवणराक्षसः हतः पुरुषशार्दूल वरं वरय सुव्रत २ वरदास्तु महाबाहो सर्व एव
समागताः विजयाकांक्षिणस्तुभ्यममोघं दर्शनं हि नः ३ वरदास्तु महाबाहो सर्व एव समागताः
विजयाकांक्षिणस्तुभ्यममोघं दर्शनं हि नः ३ देवानां भाषितं श्रुत्वा शूरो मूर्ध्नि कृतांजलिः प्रत्यु
वाच महाबाहुः शत्रुघ्नः प्रयतात्मवान् ४ इयं मधुपुरी रम्या मधुरा देवनिर्मिता निवेशं प्राप्नुयाच्छी
घ्रमेषमेऽस्तु वरः परः तं देवाः प्रीतमनसो बाढमित्येव राघवं भविष्यति पुरी रम्या शूरसेना न संशयः ६
ते तथोक्त्वा महात्मानो दिवमारुरुहुस्तदा शत्रुघ्नोऽपि महातेजास्तां सेनां समुपानयत् ७ सा सेना
शीघ्रमागच्छच्छ्रुत्वा शत्रुघ्नशासनं निवेशनं च शत्रुघ्नः श्रावणेन समारभत् ८ सा पुरी दिव्यसंका
शा वर्षे द्वादशमे शुभाः निविष्टः शूरसेनानां विषयश्चाकुतोभयः ९ क्षेत्राणि सस्ययुक्तानि काले
वर्षति वासवः अरोगा वीरपुरुषाः शत्रु

नायाः पौरजानपदानां संसारंभः आरंभने स्म ८ द्वादशमे द्वादशे पुरा
हर्वंशाधार्मिके द्वादशे वर्षे निविष्टः शूरसेनानां विषयो देशाः सा पुरीति पाठे सा पुरी निविष्टा विषयो देशश्च निविष्ट इत्यर्थः ९ १० १५१

282 अर्द्दं वंद्प्रतीकाशांतिपुरीसंस्थानकथनं वीथिकस्यास्तीनमार्थं ११ तेनलवणेनयतमस्ंपुरापूर्वंकृतंतदेवसुभ्रंयवलंकृतानानावर्णैश्चि
त्रैरूपशोभितंयथाभवतितथारोभयतिस्मेत्यर्थः १२ १५१ इत्यार्षेरामायणेसमतितमः ७० अथशत्रुघ्नस्यागमनमक्षयेवाल्मीकयाश्रमेरा

अर्थवंद्प्रतीकाशायमुनातीरशोभिता शोभितागृहमुख्यैश्चवृतरापणवीथिकैः वातर्वणपसमा
युक्ताः नानावाणिजशोभिता यच्चतेनपुराशुभ्रंलवणेनकृतंमहत् तच्छोभयत्निशत्रुघ्नोनानाव
र्णोपशोभितं १२ आरामैश्चविहारैश्चशोभमानासमंततः शोभितंशोभनीयैश्चतथान्यैर्दैवमानुषैः १३
तांपुरींदिव्यसंकाशांनानापण्योपशोभितां तांसमृद्धांसमृद्धार्थःशत्रुघ्नोभरतानुजः १४ नानादे
शागतैश्चापिवणिग्भिरुपशोभितां निरीक्ष्यपरमप्रीतःपरंहर्षमुपागमत् १५ तस्यबुद्धिःसमुत्प
न्नानिवेशमधुरांपुरीं रामपादौनिरीक्षेहंवर्षेद्वादशआगते १६ ततःसताममरपुरोपमांपुरीं निवेश्यवैवि
विधजनाभिसंवृतां नराधिपोरघुपतिपाददर्शनेदधेमतिंरघुकुलवंशवर्धनः १७ इत्यार्षेरामायणेसप्ततितमः सर्गः ७० ततोद्वादशमेवर्षेशत्रुघ्नोरामपालितां अयोध्यांचकमेगंतुमल्पभृत्यबलानुगः १ ततोमंत्रिपुरोगांश्चबलमुख्यान्निवर्त्यच जगामहयमुख्येनरथानांचशतेनसः २

सचरितस्यबलं ततोद्वादशमहति अल्पाभृत्याबलानिचानुगाश्चयायिनोयस्यसः १ बलमाख्यानबलस्थानात् २

ओं· रा·उ· टी· १४२

283 गणीत्वासान पूर्वमेवैनावद्विर्वासैः वाल्मीकाश्रमं यास्यामीति संख्यातान वाल्मीकेरयं वाल्मीकः स चासावाश्रमस्तं ३ लवणस्य व
याश्रितं कथालापमिति शेषः न हृतं तव पूर्वकैरिति पाठे न वः पूर्वकैर्मांधात्रादिभिर्यद्रहृतं तेन मयाहृतमित्यर्थः ९ तत्र तत्रेति तेन ८ म

स गत्वा गणितान्वासान्सप्ताष्टौ रघुनंदनः वाल्मीकाश्रममागत्य वासं चक्रे महायशाः ३ सोभिवा
द्य ततः पादौ वाल्मीकेः पुरुषर्षभः पाद्यमर्घ्यं तथातिथ्यं जग्राह मुनिहस्ततः ४ बह्वीरूपाः समधु
राः कथास्तत्र सहस्रशः कथयामास स मुनिः शत्रुघ्नाय महात्मने ५ उवाच च मुनिर्वाक्यं लवण
स्य वधाश्रितं सुदुष्करं कृतं कर्म लवणं निघ्नता त्वया ६ बहवः पार्थिवाः सौम्य हताः सबलवाह
नाः लवणेन महाबाहो युध्यमाना महाबलाः ७ स त्वया निहतः पापो लीलया पुरुषर्षभ ज
गतश्च भयं तत्र प्रशान्तं तव तेजसा ८ रावणस्य वधो घोरो यत्नेन महात्मनः इदं च सुमहत्कर्म
त्वया कृतमयत्नतः ९ प्रीतिश्चापि परा जाता देवानां लवणे हते भूतानां चैव सर्वेषां जगतश्च
प्रियं कृतं १० तच्च युद्धं मया दृष्टं यथावत्पुरुषर्षभ सभायां वासवस्याथ उपविष्टेन राघव ११
ममापि परमा प्रीतिर्हृदि शत्रुघ्न वर्तते उपाघ्रास्यामि ते मूर्ध्नि स्नेहस्यैषा परा गतिः १२

महत्कर्म रावणवधात्पिडुष्करमिदं कर्म लवणवधरूपं न घायत्नतो लीलयैव कृतं ९ वासवस्य सभायामुपविष्टेनापि मया तद्युक्तं

यथावद्दृष्टं चदेवेति शेषः इष्टमित्यस्यकृत
मित्यर्थो मूर्ध्निवाग्रतो पर्गतेः १२

284 गीतस्य माधुर्यं यत्र ताद्दृशं रामचरितं तस्मिन्काले पूर्वकाले यथा रामेण कृतं ताद्दृशमेव काव्यनिबद्धं शुश्राव क्वचिदाश्रमप्रदेशे गायतोः कुशलव
योर्मुखादिति शेषः ४७ तन्त्रीलयसमायुक्तं तन्त्री वीणा तन्त्र्याः स्वनेन लयस्य तालपरिच्छेदस्य समनुरूपं त्रीणि स्थानानि उरःकण्ठशिरांसि तेषु
करणानां मन्द्रमध्यताराभेदेनोच्चारणं तेनान्वितं संस्कृतवाक्यबद्धं लक्षणोपेतं व्याकरणलक्षणैर्वृत्तलक्षणैः काव्यलक्षणैः संगीतशास्त्रल

इत्युक्त्वा महर्षिणा तु ह्यनुपाठ्य महामतिः ग्रथ्यमकरोत्तस्य चेतस्य पदात्मगाः ४६ स भुक्त्वा नृप
श्रेष्ठो गीतमाधुर्यमनुत्तमं शुश्राव रामचरितं तस्मिन्काले यथाकृतं ४७ तन्त्रीलयसमायुक्तं त्रि
स्थानकरणान्वितं संस्कृतं लक्षणोपेतं समतालसमन्वितं ४८ शुश्राव रामचरितं तस्मिन्काले
पुराकृतं तान्यक्षराणि सत्यानि —————— पूर्ववृत्तशः ४९ श्रुत्वा पुरुषशार्दूलो विसंज्ञो बाष्पलोच
नः संमुहूर्तमिवासंज्ञो विनिःश्वसन्मुहुर्मुहुः ५०

लक्षणैश्चोपेतं समतालेन तालवृन्तेन समन्वितं ४८ रामचरितं रामचरितगीतं तस्मिन्काले पुरा पूर्वं रामेण यथानुभूतं च तथैव शुश्राव
तदेव पुनराहृतानीति अक्षराणि अक्षरघटितवाक्यानि पूर्वशः पूर्वकाले यथाकृतानि यथाकृतार्थकानि घट्टा यथाकृतानि वृत्तलक्षणमन
तिक्रम्य निबद्धानि पूर्वशः आनुपूर्व्येण ४९ श्रुत्वा पुरुषशार्दूलः शत्रुघ्नो विसंज्ञः हर्षाद्विवेकशून्योऽभूदिति शेषः संमुहूर्तमसंज्ञ इव स्थितिः
यस्मात् बाष्पविवर्णो विस्मयातिरेकान्मुहुर्मुहुर्निश्वसन् ५०

285 तस्मिन्गीते यथावृत्तं अतीतमपि वर्तमानमिवाशृणोत् स्ववधात् अतीतास्तु पूर्वार्धाः प्रत्यक्षवद्भांतीति भावः येषां तु राज्ञः मधुराराज्य
उ॰ स्य शत्रुघ्नस्य पदानुगास्तेपि गीतसंपदं प्रकृताः १८ एवं रामचरितगायकोस्माभिर्न दृष्टपूर्व इति वेदादवक्तुमशक्यत्वादिति शिष्टाः संतश्चा
गा३ श्चर्यमित्यब्रुवन् यद्वा येत्र गीतिरूपालास्ते स्वयं तावद्दृष्टगीतिनेश्रवणाभावादवाग्ज्ञत्वाश्चर्यः ये वै सैनिकास्ते परस्परं संबभाषिरे १९ नदेवा
टी॰ तस्मिन्गीते यथावृत्तं वर्तमानमिवाशृणोत् यदानुगास्त्वथेरात्तस्वात्रकृत्वा गीतिसंपदं १८ अवाङ्मु
१५३ खाश्चदीनाश्चर्याश्चर्यमिति वाब्रुवन् परश्चेयतत्र सैनिकाः संबभाषिरे १९ किमिदं क्ववर्तो
मः किमेतत्स्वप्नदर्शने अर्थायोनः प्रत्यहृष्टस्तमासाद्यमपदेशनः २० श्रुणुमः किमिदं स्वप्ने गीतं वै
यमत्र तम विस्मयं ते परं गत्वा वाचमिदमब्रुवन् २१ साधुपृच्छ नरश्रेष्ठ वाल्मीकिं मुनिपुंगव
शत्रुघ्नस्त्वब्रवीत्सर्वान्कौतूहलसमन्वितान् २२ सैनिकान्नतमोस्माकं परिदृष्टमिहेदृशः आ
श्चर्याणि बहूनीह भवंत्यस्याश्रमे पुने २३ नततेकौतूहलाग्रक्रमन्वेष्टेनं महामतिं एवं तेह्याक
म्यकात्तसैनिकान्रघुनंदनः अभिवाद्य महर्षिं तं स्वनिवेशं ययौ तदा २४

हकिमितिक्वर्तामः श्रावयेमे अस्यत्रवायौर्थानोस्माकं अस्माभिः प्रत्यहृष्टस्तमर्थमासाद्यमपदेश्णुमः किमिदमाश्रमवर्तिभिरत्र
भूवे नाशक्यानिर्वचनत्वादिति भावः यदेमतः स्वप्ने स्वदीये एवगीतवंयमश्रुणुमो वयं तत्र कुतूहलं दृष्टस्यापि स्वप्नत्वादिति संबभाषिरे
इति संबभाषिरे इति संबंधः १९ साधुपृच्छेति किं कर्तृकं गानमितीति शेषः २२ ईदृशार्थः परिदृष्टेन तेन भवः २३ अन्वेष्टुमवगंतुं श्रोत्रं १५३ २५

२८६ इत्यार्षे उत्तरकांडे एकसप्ततितमः ७१ अथ शत्रुघ्नस्य रामं दृष्ट्वा पुनः प्रतिनिवृत्तिः नमितिः १ तस्य रामगीतस्य २ पूर्वाह्णिकं कर्म शोधावस्थाना

इत्यार्षे उत्तरकांडे एकसप्ततितमः ७१ तेन यानेन नरव्याघ्रो निद्रां नाभ्यागमत्तदा चिंतयानमनेकार्थं रा
मगीतमनुत्तमं १ तस्य शब्दसुमधुरं तंत्रीलयसमन्वितं श्रुत्वा सुविजिग्राम शत्रुघ्नस्य महात्मनः
तस्यां रजन्यां व्युष्टायां कृत्वा पौर्वाह्णिकक्रमं उवाच प्रांजलिर्वाक्यं शत्रुघ्नो मुनिपुंगवं ३ भगवन् द्र
ष्टुमिच्छामि राघवं रघुनंदनं त्वयानुज्ञातमिच्छामि महर्षिभिः शंसितव्रतैः ४ इत्येवंवादिनं तं तु शत्रु
घ्नं शत्रुसूदनं वाल्मीकिः संपरिष्वज्य विससर्ज स राघवं ५ सोभिवाद्य मुनिश्रेष्ठं रथमारुह्य सुप्रभं
अयोध्यां स गमत्तूर्णं राघवोत्सुकदर्शनः ६ स प्रविष्टः पुरीं रम्यां श्रीमानिक्ष्वाकुनंदनः प्रविवेश म
हाबाहुर्यत्र रामो महाद्युतिः ७ स रामं मंत्रिमध्यस्थं पूर्णचंद्रनिभाननं पश्यन्नमरमध्यस्थं सहस्र
नयनं यथा ८ सोभिवाद्य महात्मानं ज्वलंतमिव तेजसा उवाच प्रांजलिर्भूत्वा रामं सत्यपराक्रमं
यदाज्ञप्तं महाराज सर्वं तत्कृतवानहं हतः स लवणः पापः पुरी चास्य निवेशिता १०

र्यसंध्यावंदनब्रह्मयज्ञानंतर्यपूर्वाह्णसंबंध्यावारकर्मं ३ राघवं रघुगोत्रापत्यं रघुनंदनं रघुकुलस्यानंदजनकं त्वयायानुज्ञातेन त्वया न
ज्ञातुमिच्छामि ४ ५ ६ पुरीमयोध्यां ७ ८ ९ अस्य पुरी निवेशिता सर्वप्रजानिवेशनेन प्रतिष्ठापिता १०

उ॰ 287 क्षत्रियचेष्टितं क्षत्रियाचारः १३ हि यस्मात् क्षत्रियाणां प्रजाः सर्वथा परिपाल्या इति हि प्रसिद्धं १४ मासचलोकितुमयोध्यामागच्छ
रा॰ तव श्वेरं गंतासि गच्छेत्यर्थः १५ १६ १७ १८ यथाज्ञया यथावत्कृतयाज्ञया १९ २० २१ २१ ॥
टी॰
१५५

द्वादशैतानि वर्षाणि त्वां विना रघुनंदन नोत्सहेयमहं वस्तुं त्वया विरहितो नृप ११ स मे प्रसादं
काकुत्स्थ कुरुष्वामितविक्रम मातृहीनो यथा वत्सो न चिरं प्रवसाम्यहं १२ मातृहीनो यथाव
त्सो न चिरं प्रवसाम्यहं एवं ब्रुवाणं काकुत्स्थं परिष्वज्येदमब्रवीत् मा विषादं कृथाः शूर नैतत्क्षत्रिय
चेष्टितं १३ नावसीदंति राजानो विप्रवासेषु राघव प्रजा हि परिपाल्या हि क्षत्रधर्मेण राघव १४
काले काले च मां वीर अयोध्यामवलोचितुं आगच्छ त्वं नरश्रेष्ठ गंतासि च पुरं तव १५ ममापि त्वं सुद
यितः प्राणैरपि न संशयः अवश्यं करणीयं च राज्यस्य परिपालनं १६ तस्मात्त्वं वस काकुत्स्थ पंचरात्रं
मया सह ऊर्ध्वं गंतासि मधुरां सभृत्यबलवाहनः १७ रामस्यैतद्वचः श्रुत्वा धर्मयुक्तं मनोनुगं शत्रु
घ्नो दीनया वाचा बाढमित्येव चाब्रवीत् १८ स पंचरात्रं काकुत्स्थो राघवस्य यथाज्ञया उष्य तत्र महे
ष्वासो गमनायोपचक्रमे १९ आमंत्र्य तु महात्मानं रामं सत्यपराक्रमं भरतं लक्ष्मणं चैव महारथमु
पारुहत् २० दूरं पद्भ्यामनुगतो लक्ष्मणेन महात्मना भरतेन च शत्रुघ्नो जगामाशु पुरीं तदा २१

288 इत्यार्षे रामायणे वाल्मीकीये उत्तरकांडे द्विसप्ततितमः सर्गः ७२ अथ मृतबालकब्राह्मणराजद्वारिविलापः अशोऽप्येति भ्रातृभ्यां लक्ष्मणाभ
रताभ्यां कतिपयाहः सुगते क्षितिशोऽथः २ स्नेहेन पुत्रस्निग्धेन तन्मारणाद्दुःखेन च समन्वितः ३ यद्यस्मात्प्रियतनं गतं त्वा पश्यामि अत्र तेऽमे मया
किं दुष्कृतं कृतं ४ किं च देव पुत्रकाप्राप्तयौवनं मम दुःखाय अकाले कालमायं त्वं पश्यामी मत्तु षगः पंचवर्षसहस्रके वर्षप्राह्नोत्रदिन

इत्यार्षे रामायणे उत्तरकांडे द्विसप्ततितमः सर्गः ७२ अथ स्थाप्य तु स शत्रुघ्नं भ्रातृभ्यां सह राघवः अमु
मोदत सुखी राज्यं धर्मेण परिपालयत् १ ततः कतिपयाहः सु वृद्धो जानपदो द्विजः मृतं बालमुपा
दाय राजद्वारमुपागमत् २ किं नु मे दुष्कृतं कर्म पुरा देहांतरे कृतं रुदन्बहुविधा वाचा स्नेहदुःखस
मन्वितः असकृत्पुत्र पुत्रेति वाक्यमेतदुवाच ह ३ किं नु मे दुष्कृतं कर्म पुरा देहांतरे कृतं यदहं पु
त्रमेकं तं पश्यामि निधनं गतम् ४ अप्राप्तयौवनं बालं पंचवर्षसमन्वितम् अकाले कालमापन्नं
मम दुःखाय पुत्रक ५ अल्पैरहोभिर्निधनं गमिष्यामि न संशयः अहं च जननी चैव तव शोकेन
पुत्रक ६

पदः सहस्रसंवत्सरं सत्रमुपासीतेतिवत् तेन षोडशवर्षमित्येके ५ तव शोकेनाहं तव जननी च निधनं गमिष्या
मि अस्य मरणे तत्कृतं किंचिन्न कारणमित्याह नेति सर्वेषां प्राणिनां तद्विषयमन्यत्र हिंसादिकमपि पापं मनोवाक्कायैरतिष्ठावरणंस्व
कृतं न स्मरामि ६

श्रुतं नवादेव सर्वेषां प्राणिनां प्राणं न कदाचन विद्यते इति पाठे सर्वेषां प्राणिनां प्राणान्हि स्वप्नयापि कृतां हिंसां न स्मरामि अतो मम कदाच
न जन्मांतरेपि पापं न विद्यते जन्मांतरेपि पापं न विते जन्मांतरे तत्करणे संस्कारेण तज्जन्मन्यपि तत्प्रवृत्तिः स्यादिति भावः ७ पितृका

न स्मराम्यनृतं ह्युक्तं न च हिंसां स्मराम्यहं सर्वेषां प्राणिनां पापं न स्मरामि कदाचन ७ केनाद्य दुष्कृते
नायं वाल एव समात्मजः श्रुत्वा पितृकार्याणि गतो वैवस्वतक्षयं ८ नेदृशं दृष्टपूर्वं मे श्रुतं
वा घोरदर्शनं मृत्युरप्राप्तकालानां रामस्य विषये ह्ययं ९ रामस्य दुष्कृतं किंचिन्महदस्ति न संश
यः तथा हि विषयस्थानां बालानां मृत्युरागतः १० नह्यन्यविषयस्थानां बालानां मृत्युतो भयम्
स राजन् जीवयस्वैनं बालं मृत्युवशं गतम् ११ राजद्वारि मरिष्यामि पत्न्या सार्धमनाथवत् ब्रह्मह
त्यां ततो राम समवाप्य सुखी भव १२ भ्रातृभिः सहितो राजन् दीर्घमायुरवाप्स्यसि उषिताः स्म
सुखं राज्ये तवास्मिन्सुमहाबल १३ इदं तु पतितेऽस्माकं तव राम वशे स्थितान् कालस्य वश
मापन्नाः स्वल्पं हि न हि नः सुखम् १४

कार्याणि श्राद्धादीनि ८ रामस्य विषये देशे ९ तस्माद्राजदोषादेव बालमरण
मित्याह रामस्येति १० स राजन्निति साभिप्रायेन वादः ११ सुखी भव इति व्यंग्योक्तिः १२ उषिताः स्म एतावत्कालमिति शेषः १३ इदं बा
लकमरणदुःखं विद्यत इदानीं वयं कालस्य वशमापन्नाः हि तस्मात्तव राज्ये नोस्माकं स्वल्पमपि सुखं नहि १४

290 इदानीमिक्ष्वाकूणामयं विषयो देशो रामं बलानामन्तकरोति ताहृशेनाथमासाद्य प्राप्यानाथो जातो रक्षकस्य राजरहितो जातः ॥५ कथमे
वं वादस्तत्राह राजदोषैर्विरिति असद्वृत्ते धर्मेण प्रजापालनहीने ॥९ अयुक्तानि अनुचितकृत्यानि न च रक्षास्ति अनुचितकारिवारणं च
यदा नास्ति तदैवकालकृतं अकालमरणकृतं नाम भयं तत्र भयः ॥७ तस्मान्मत्पुत्रमरणे राजदोषहेतुकमेव स्यादित्याह सुव्यक्तमिति पुरे ज
नपदे वा अनुचितकृत्यस्य तदंडाभावरूपो राजदोषो जातो भविष्यति न यातस्मादेवायं बालवधः तथा कालवयोह्ययमिति पाठांतरं ॥८

संपन्नानां च्यवो विषय इक्ष्वाकूणां महात्मनां । रामं नाथमिहासाद्य बालान्तकरणं ध्रुवं ॥५ राजदोषै।
र्विपद्यंते प्रजा ह्यविधिपालिताः । असद्वृत्ते हि नृपतावकाले म्रियते जनः ॥९ यद्वा पुरेष्वयुक्तानि
जना जनपदेषु च । कुर्वते न च रक्षास्ति तदाकालकृतं भयं ॥७ सुव्यक्तं राजदोषो हि भविष्यति न सं
शयः । पुरे जनपदे चापि तथा बालवधो ह्ययं ॥८ एवं बहुविधैर्वाक्यैरुपरुध्य मुहुर्मुहुः । राजानं
दुःखसंतप्तः सुतं तमुपगूहति ॥९ इत्यार्षे रामायणे वाल्मीकीये उत्तरकांडे त्रिसप्ततितमः सर्गः ॥७३
तथा तु करुणं तस्य द्विजस्य परिदेवनं । शुश्राव राघवः सर्वं दुःखशोकसमन्वितं ॥१

राजानमुपरुध्य हैरयत्वयः ॥९ इत्यार्षे उत्तरकांडे त्रिसप्ततितमः सर्गः ॥७३ अथ महर्षीनाहूय तान्प्रति बालमरणनिमित्तप्रश्नेनेभ्यस्तन्नि
मित्तज्ञानलाभः तथा तु इति सर्वं परिदेवनं दुःखमात्मनो वार्धकादिनिमित्तं शोकः पुत्रवियोगजस्ताभ्यां समन्वितं शुश्राव ॥१
॥ । ॥

ॐ· 291 नैगमाःपौराणास्तत्सहितान् २ अञ्जलिताःकृतशिष्टाचाराः अयंद्विजउपरोधतिउपरुणद्धिराजद्वारमितिशेषःसर्वंराजदोषमूलमेववा
रा॰उ· लमरणंवदतीमादिकंचसर्वमाचष्टे ८ हेराजन्नयंबालस्यसंक्षयोयथायेनप्रकारेणअकारणेअकालेसंप्राप्तस्तच्छृणुघततस्त
टी· स्यप्रतिक्रियाकर्तव्यतामनुष्ठेयांशंकृत्वाकुरुष्व ८ नदेवंत्रेतायांपीडिकामाहपुरेतितपस्विनः अनशनाद्यप्रमेनेकैकायक्लेशा
१५८

सतुःखेवचसंतेषांमंत्रिणस्तानुपाह्वयत वसिष्ठंवामदेवंचभ्रातॄंश्चसहनैगमान् २ ततोद्विजाव
सिष्ठेनसार्धमष्टौप्रवेशिताः राजानंदेवसंकाशंवर्धस्वेतिततोब्रुवन् मार्कण्डेयोथमौद्गल्योवा
मदेवश्चकाश्यपः कात्यायनोथजाबालिर्गौतमोनारदस्तथा ४ एतेद्विजर्षभाःसर्वेआसनेषूप
वेशिताः महर्षीन्समनुप्राप्तानभिवाद्यकृताञ्जलिः ५ मंत्रिणोनैगमांश्चैवयथार्हमनुकूलिनः
तेषांसमुपविष्टानांसर्वेषांदीप्ततेजसां ६ राघवःसर्वमाचष्टेद्विजोयमुपरोधति तस्यतद्वचनंश्रु
त्वाराज्ञोदीनस्यनारदः ७ शृणुराजन्यथाकालेप्राप्तोबालस्यसंक्षयः श्रुत्वाप्रतिक्रियांराजन्
कुरुष्वरघुनंदन ८ पुराकृतयुगेराजन्ब्राह्मणावैतपस्विनः ९ अब्राह्मणस्तदाराजन्नतप
स्वीकथंचन तस्मिन्युगेप्रज्वलितेब्रह्मभूतेत्वनावृते १०

शलक्षणतपोयुक्ताब्राह्मणाएवकृतेभवन् ९ अ
ब्राह्मणस्तद्व्यतिरिक्तःकथमपितपस्वीन;कृतेइतिशेषः किंतुनित्यनैमित्तिककर्ममात्रपरएवतस्मिन्युगेप्रज्वलितेतपसादी
प्तेब्रह्मभूतेब्राह्मणवर्णप्रधानेनावृतेनावृतेअज्ञानावरणरहितजनेषुगेकृतयुगे १० १५८

292 सर्वे एव तदा मानवा जज्ञिरे महाराज ऋ विहितधर्मलेशस्याप्यभावात् अनाहतज्ञानत्वाच्च दीर्घदर्शिनः अतीतानागतादिसकलज्ञानवंतः
ततः कृतयुगसमाप्त्यनंतरं वपुष्मतोपि शिथिलब्रह्मात्मबुद्धितया किंचिद्देहात्मबुद्धिमंतो मानवा नो त्रेतायुगे नाम भवति ॥ यत्र त्रेतायुगे ऋ
र्वेणाश्वेवं युगसवर्णा ब्राह्मणानुष्ठितेन तपसान्विताः क्षत्रिया जायंते नादृशे त्रेतायुगं नामाभूदिति संबंधः कृतयुगे ब्राह्मणमात्रति
ष्ठेत्तपस्त्रेतायां क्षत्रियसाधारणमतायां क्षत्रियसाधारणमभूदिति भावः त्रयीविहितत्रेताग्निसाध्यकर्मसप्रवृत्त्या युगस्य त्रेतासंज्ञेति पुराण
विदः किंच तत्र त्रेतायुगे युगे त्रेतायुगाख्ये युगे महात्मानः स्वल्पपौरुकाये मानवा ब्राह्मणात्क्षत्रिया वा संति तदपेक्षया पूर्वस्मिन् जन्मनि ए

पुरुस्तु वस्तदा सर्वे जज्ञिरे दीर्घदर्शिनः ततस्त्रेतायुगं नाम मानवानो वपुष्मतां ॥ क्षत्रियायत्र जायंते ए
र्वेणतपसान्विताः वीर्येण तपसा चैव तेधिकाः पूर्वजन्मनि मानवा ये महात्मानस्तत्र त्रेतायुगे युगे
ब्रह्मक्षत्रं च तत्सर्वं यत्पूर्वमवरं च यत् युगयोरुभयोरासीत्समवीर्यसमन्वितं ॥१२॥

र्वं जाते कृतयुगे तपोभाजो ये मानवास्ते वीर्येण प्रभावेण तपसा तपोतिशयेनाधिका उत्कृष्टाः ॥१२॥ अथ त्रेतायुगकालिकक्षत्रिया
णां कृतकालिकब्राह्मणेभ्यो न्यूनत्वात् त्रेताकालिकब्राह्मणैः समत्वमाह ब्रह्मक्षत्रमिति उभयोर्युगयोर्मध्ये कृतयुगे ब्रह्म पूर्वं तपो
वीर्याभ्यामुत्कृष्टं क्षत्रं चावरं च ताभ्यां न्यूनमासीत् तत्सर्वं ब्रह्मक्षत्ररूपमुभयं त्रेतायां समवीर्यसमन्वितमासीत् कृते क्षत्रियाणां त
पस्यनधिकारात् युगयेभ्यो ब्राह्मणेभ्यस्ते सेषां न्यूनता त्रेतायां तूभयोरपि तपोधिकार उभावपि तयोर्वीर्याभ्यां समाविति भावः अथो
त्कृतयुगब्राह्मणेभ्यस्त्रेतायुगब्राह्मणानामपि न्यूनत्वमकम ॥१३॥

उ॰ २९३ अतेस्त्रेतायुगे ब्राह्मणक्षत्रिययोस्तयोर्विशेषेण तपोमध्ये ब्राह्मणस्य ततः क्षत्राद्धिकं विशेषमपश्यंस्ते मनस्विनः सर्वेऽतोऽकालिकाः
यमप्रवर्तनाधिकृताः चातुर्वर्ण्यस्थापने ब्राह्मणादिचतुर्वर्णानां संमतमनादितः सर्वलोकसंमतं स्थापनं वर्णानां मार्जनेन च भेदक
रा॰ स्थापनं चास्मिंस्त्रेतायुगे चक्रिरे कृते तु विनैव स्थापनं स्वयमेव सर्वे वर्णाः स्वस्वधर्मरता इति भावः १४ तस्मिंस्त्रेतायुगे धर्मभूते व
टी॰ र्णाश्रमप्रवृत्त्या यागादिधर्मबाहुल्येनावृते धर्माचरणप्रतिबंधकपापरहिते प्रज्वलिते नैव धर्मेण प्रदीप्ते सति यत्र धर्मो हिंसानृता
७४ स्तेयादिविग्रहरूपचतुष्पात् पृथिवीतले पादं चतुर्थांशं पातयत् प्रवर्तयामास स्पष्टः एवं त्रेतायुगप्रकर्षा इव निर्मलज्ञानराहित्या
ब्रह्मात्मानाधिकास्वरूपा अग्निहोत्राधिदैवेणैव प्रवृत्ताः ज्ञानाभावादेव चाधर्मोऽपि पादेन प्रवृत्त इति भावः १५ अतएव तेऽकृ

अपश्यंत स्त्वते सर्वे विशेषमधिकं ततः स्थापनं चक्रिरे तत्र चातुर्वर्ण्यस्य संमतं १४ तस्मिन्युगे प्रज्व
लिते धर्मभूते ह्यनावृते अधर्मः पादमेकं तु पातयत्पृथिवीतले १५ अधर्मेण हि संयुक्तस्तेजो मंदं भ
विष्यति १६ आमिषं यच्च पूर्वेषां राजसं च मलं भृशं अनृतं नाम तद्भूतं क्षिप्तेन पृथिवीतले १७

तद्युगप्रकर्षेभ्यः क्षीणत्वादधर्मेणेति यतस्तेन संयुक्तो लोको वर्णाश्रमाधिकृतो भवति तत्र स्वस्वतेजो मंदं भविष्यति १६ ए
एवं च तेषां कृष्यादिकमेव जीवनोपायः इत्याहामिषमिति पूर्वेषां कृतयुगस्थानां स्वधर्मस्पष्टं मलं मलवर्ज्यं यद्राजसं रजोगुणमूलमामि
षं जीवनोपायरूपं कृष्याद्यासीत् तदनृतं नामसेवाप्रवृत्तिरनृतं कृषिरिति कोशात् तद्रूपेण पादेन पृथिवीतले भूते आमसमर्थमेणां निशे
षः कृतवान् रूपव्याहारा इति भावः इति तीर्थः कतकस्तु आमिषं पूर्वेषां स्वस्ववंशानीयत्वान्निषेधदेशादेदह स्राज्ञादित ब्रह्मस्य राजसं र
जोगुणमूलं हेयत्वं लक्षणं भवति त्रेतायामिति शेषः काम एव क्रोध एष रजोगुणसमुद्भव इति श्लोकैः कौना माधर्मस्य पादस्तत्राहानृतमिति
नियेन पृथिवीतले प्रेतपादेन ततः मापुरूपं मलं भूतं तदनृतं नाम देहात्मनाभीः रूपमिथ्याज्ञानात्मकः सर्वानर्थमूलो हका रम्यः प्र

२ ७४

२९५ तत्पादयोः किं भवतीत्याह ध्वस्तमिति उक्तरूपमेकमन्दं तं पातयित्वा निष्पाद्य धर्मतो धर्मतो धर्मेण पूर्वयुगे परिमितस्यायुषः परिनिष्ठितं परि
माणं प्रादुर्भूतं तेन त्रेतायुगे उरुषापेक्ष्या त्रेतायुगे पुरुषाणां प्रभावादिन्यूनता आयुर्न्यूनता चोक्ता १८ अथाहुः त्वयकारकारकाधर्मपादपरिहारहेतुव्या
पारोपदेशः पातितेति तिष्यधर्मेण तस्मिन्नष्टे तेनोक्तलक्षणं तत्पादे महीतले पातिते सति तत्प्रयुक्ताहुः त्वयपरिहाराच्छुभान्येव यज्ञदानतपांसि
शुभान्येकर्माण्येवाचरन्तलोको धर्मादिकारितः सत्यधर्मपरायणो भवति अनेन त्रेतायां यज्ञायज्ञानुष्ठानेन पुष्टहविर्भक्षैः देवतिदेहात्माभि
मानतिहृतिति सूक्तम् १९ उक्तमेव स्पष्टीकरोति त्रेतेति ब्राह्मणाः क्षत्रियाश्च येन यज्ञादिशुद्धवित्तास्तपोनिष्ठाः अपरे सर्वे विट्शूद्र

ध्वस्तं तं पातयित्वा तु पादमेकमधर्मतः । ततः प्रादुर्भूतं पूर्वमायुषः परिनिष्ठितं १८ पातिते तु हते तस्मिन्धर्मेण महीतले । शुभान्येवाचरन्लोकाः सत्यधर्मपरायणाः १९ त्रेतायुगे च वर्तन्ते ब्राह्मणाः क्षत्रियाश्च ये । तपो तप्यन्त ते सर्वे शुश्रूषामपरे जनाः २० स्वधर्मः परमस्तेषां वैश्यशूद्रास्तदागमन् । पूजां च सर्ववर्णानां शूद्राश्चक्रुर्विशेषतः २१ एतस्मिन्नन्तरे तेषामधर्मवान्वैवहू ततः पूर्वेषु

शूद्रसंकरविशेषाः ब्राह्मणक्षत्रियशुश्रूषां चक्रुरिति शेषः २० अथ एवं तेषां मध्ये वैश्यशू नष्टाः समगमन्स्वपरस्परम् २२
द्रमसा द्वारहेतुः शुश्रूषा तु पः परमः स्वधर्मः उत्कृष्टः स्वधर्मो भूतभागमतः प्राप्तो भूत् तेदेवाह पूजां चेति सर्ववर्णानां त्रैवर्णिकानां पवंच
वैश्यस्य कृष्यादिकरणे तद्धि वर्णे स्वधर्म इति शेषः तदुक्तमिति वार्थं २१ अथ द्वापरहेतिं दर्शयितुमाह एतस्मिन्नन्तरे त्रेतायुगाव
सानकाले तेषां वैश्यशूद्राणामन्तः तद्रूपे धर्मपादे सम्प्रक्रामे सती ति शेषः ततः पूर्वे ब्राह्मणाः क्षत्रियाः न्यासमगमन्स्वामाः प्रापुः स
मुपागमन्तिति पादेमेवकदोषस्य स्वामिप्राप्यत्वात् राष्ट्रयोषात् भीतावभूवुः २२

ओं. 295 ततस्तदनंतरमधर्मस्य द्वितीयं पादं समवतारयत् अधर्ममवतारयन् २१ ततो द्वितीयपादावतारेणादेव तृतीययुगस्य द्वापरसंज्ञा द्वापर इति
नाम पृषोदरादित्वात्साधुः तत्कालिकलोकस्थितिमाह तस्मिन्निति द्वापरसंज्ञे द्वापरसंज्ञयुगस्याधर्मपादद्वयसत्वे युगक्षये अधर्मः तेषु
रा.उ. गे वर्तमाने अनृतहृष्याश्चयं प्राप्याधर्मः विहितातिक्रमरूपः अनृतं चैव ववृधे संभावसमतयोगाधिक्यात् तीर्थस्तत्र अधर्मे द्वितिरमाल्पत्वं चास्त्र
टी. द्वितद्बुद्धिः प्रयासबाहुल्येन अल्पविसकलल्पमित्यर्थः २४ एतद्वधिफलमाह वैश्यं तपः समाविशत् पूर्वं त्रिभ्यो युगेभ्यः समस्त्यर्थं चतस्यो
१५८ ततः पादमधर्मस्य द्वितीयमवतारयत् ततो द्वापरसंज्ञासौ युगस्य समजायत २१ तस्मिन्द्वापरसं
ज्ञे तु वर्तमाने युगक्षये अधर्मश्चानृते चैव ववृधे पुरुषर्षभ २४ अस्मिन्द्वापरसंज्ञे तु तपो वै
श्यान्समाविशत् त्रिभ्यो युगेभ्यस्त्रीन्वर्णान्क्रमाद्वै तप आविशत् २५ त्रिभ्यो युगेभ्यस्त्रीन्वर्णा
न्धर्मश्च परिनिष्ठितः न स्म ते लभते धर्मं युगस्तस्मिन्नरर्षभ २६ हीनवर्णो नृपश्रेष्ठ तप्यते सुम
हत्तपः भविष्यच्छूद्रयोन्यां हि तपश्चर्या कलौ युगे २७ अधर्मः परमो राजन्द्वापरे शूद्रजन्मनः
त्रियुगे २५ तथा त्रियुगेषु त्रीन्वर्णान्क्लैव धर्मस्तपोरूपः परिनि सवै विषयपर्यन्ते तव राजन्महातपाः २८
ष्ठितः प्रतिष्ठाभूत् धर्मं तपोलक्षणं शूद्रो युगत्रयेपि न लभते २६ किं तु हीनवर्णः शूद्रः कदाचित्सुमहत्तपस्तप्यते कदा
तत्राह भविष्यदिति भविष्यत्कालवर्तिन्यां शूद्रयोन्यां शूद्रजातौ कलौ युगे तपश्चर्या भविष्यति न तु तत्कालिके इति भावः यदेव
मतो द्वापरेपि शूद्रजन्मनस्तपो धरणं परमो धर्मः किं च तायत्रेतायां सम्मूढः वैति श्रयेन तव विषयपर्यन्ते देशसमीपे महातपा भू
त्वा दुर्बुद्धिस्तपस्तप्यति तेनैव हेतुनायं बालवधो जातः २८ १५८

296 उक्तमेव दार्ढ्याय पुनराह य इति यो हि दुर्मतिः पार्थिवस्य विषये देशे पुरे वा धर्मं विहितधर्मलोपमकार्यं निषिद्धकार्यं वा करोति तद्देशे
पुरे राज्ये वा श्रीमूलमलक्ष्मीमूलं भवति तदनिवारयन् स राजापि नरकं याति इहामुत्र च परमकश्मलं प्राप्नोति नात्र संशयः २९ नन्वन्य

अप्रवृत्तं ततः दुर्बुद्धि सेन बालवधो ह्ययं यो ह्यधर्ममकार्यं वा विषये पार्थिवस्य तु २९ करोति चाश्री
मूलं तत्पुरे वा दुर्मतिर्नरः क्षिप्रं च नरकं याति स च राजा न संशयः ३० अधीतस्य च तप्तस्य कर्मणः सुकृ
तस्य च षष्ठं भजति भागं तु प्रजा धर्मेण पालयन् ३१ षड्भागस्य च भोक्तासौ रक्षते न प्रजाः कथं स
त्वं पुरुषशार्दूल मार्गस्व विषयं स्वकं ३२ दुष्कृतं यत्र पश्येथास्तत्र यत्नं समाचर एवं चेद्धर्मवृद्धिश्च
नृणां चायुर्विवर्धनं ३३ भविष्यति नरश्रेष्ठ बालस्यास्य च जीवितं ३४ इत्यार्षे उत्तरकाण्डे चतुःस
प्ततितमः सर्गः ७४ नारदस्य तु तद्वाक्यं श्रुत्वामृतमयं तथा प्रहर्षमतुलं लेभे लक्ष्मणं चेदमब्र
वीत् १ गच्छ सौम्य द्विजश्रेष्ठं समाश्वासय सुव्रत बालस्य च शरीरं तत्तैलद्रोण्यां निधापय २
गन्धैश्च परमोदारैस्तैलैश्च सुसुगन्धिभिः यथा न क्षीयते बालस्तथा सौम्य विधीयतां ३

दीयाधर्मेण कथं राज्ञः कश्मलप्राप्तिरत आह षड्भागस्येति रक्षार्थं धनधान्यसुवर्णादिषड्भागवर्तनेन भोक्ता कथं न रक्षेत् तेन न्यायेन
रक्षायां धर्मादिषड्भागप्राप्तिवत् अरक्षणे अधर्मभागप्राप्तिरपीति भावः अतः सत्वमिति ३२ यत्नं निवारणाय यत्नं ३३ इत्या
र्षे रामायणे चतुःसप्ततितमः सर्गः ७४ अथ शूद्रतपस्विनो निषिद्धदर्शनेन नारदस्येति १२३

ॐ. २९७ यथा न क्षीयेत तथा विधीयतामित्युक्तमेव विहग्गोतिपघेति श्लिष्टकर्मणः शुभाचारवालस्य शरीरः अर्थवादिगुणः सन् यथा न
रा.उ. क्षीयेत तथा विधीयतामिति पूर्वेणान्वयः विपत्तिः स्वरूपनाशः शरीरस्येति शेषः परिभेदः संधिबंधकेशादिविश्लेषो रूपभेद
टी यथा शरीरो बालस्य गुणैः सन् श्लिष्टकर्मणः विपत्तिः परिभेदो वा न भवेच्च तथा कुरु ४ एवं सं
१४९ दिश्य काकुत्स्थो लक्ष्मणं शुभलक्षणं मनसा पुष्पकं दध्यावागच्छेति महायशाः ५ इंगितं स तु
विज्ञाय पुष्पको हेमभूषितः आजगाम मुहूर्तेन समीपं राघवस्य वै ६ सोऽब्रवीत्प्रणतो भूत्वा अयम
स्मि नराधिप वश्यस्तव महाबाहो किंकरः समुपस्थितः ७ भाषितं रुचिरं श्रुत्वा पुष्पकस्य नराधिप
अभिवाद्य महर्षींस्तु विमानं सोऽध्यरोहत ८ धनुर्गृहीत्वा तूणीं च खड्गं च रुचिरप्रभं निक्षिप्य
नगरे वीरौ सौमित्रिभरतावुभौ ९ प्रयात्प्रतीचीं हरितं विचिन्वंश्च ततस्ततः उत्तरामगमद्धीमा
न्दिशं हिमवतावृतां १० अपश्यमानस्तत्रापि स्वल्पमप्यथ दुष्कृतं पूर्वामपि दिशं सर्वामथाप
श्यन्नराधिप ११ प्रविशुद्धसमाचारामादर्शतलनिर्मलां पुष्पकस्थो महाबाहुस्तदापश्यन्नरा
धिपः १२ दक्षिणां दिशमाक्रामत्ततो राजर्षिनंदनः शैवलस्योत्तरे पार्श्वे ददर्श सुमहत्सरः १३
अनङ्गभयं यथा न भवति तथा कुरु ४ पुष्पकस्तदधिष्ठात्रदेवता ६ हरितं दिशं विचिन्वन्मृग्यन्नपनमिति शेषः १० अप
श्यमानः अपश्यन् ११ शैवलस्य शैवलाख्यस्य विंध्यसमीपदक्षिणभागवर्तिगिरेः १३ १५

298 कोर्थे इति तमभ्यंतव वराश्रयः प्रीतदेवतावरं लब्धो मनीषितोभीष्टोर्थः कः स्वर्गलाभः परोन्यो वा यदर्थं तपसि १३ समस्तवाक्भवसत्तम
तस्मिन्सरसि तप्यंतं तापसं सुमहत्तपः ददर्श राघवः श्रीमांल्लंबमानमधोमुखं १४ राघवस्तमुपाग
म्य तप्यंतं तप उत्तमं उवाच वचनं वाक्यं धन्यस्त्वमसि सुव्रत १५ कस्यां योन्यां तपोवृद्ध वर्तसे दृढवि
क्रम कौतूहलात्त्वां पृच्छामि रामो दाशरथिर्ह्यहं १६ कोर्थो मनीषितस्तभ्यं स्वर्गलाभो परोथवा
वराश्रयो यदर्थं त्वं तपस्यन्यैः सुदुश्चरं १७ यमाश्रित्य तपस्तप्तं श्रोतुमिच्छामि तापस ब्राह्मणो वासि
भद्रं ते क्षत्रियो वा सुदुर्जयः १८ वैश्यस्तृतीयो वर्णो वा शूद्रो वा सत्यवाग्भव १९ इत्येवमुक्तः स नरा
धिपेन अवाक्शिरा दाशरथाय तस्मै उवाच जातिं नृपपुंगवाय यत्कारणं चैव ततः प्रयत्नः २० इत्या
र्षे रामायणे उत्तरकांडे पंचसप्ततितमः सर्गः ७५ तस्य तद्वचनं श्रुत्वा रामस्याक्लिष्टकर्मणः देव
तं प्रार्थये राम सशरीरो महायशाः १ न मिथ्याहं वदे राम देवलोकजिगीषया शूद्रं मां विद्धि
काकुत्स्थ शंबूकं वाम नामतः २ भाषतस्तस्य शूद्रस्य खड्गं सुरुचिरप्रभं निष्कृष्य कोशाद्विमले
शिरश्चिच्छेद राघवः ३ तस्मिंच्छूद्रे हते देवाः साग्निपुरोगमाः साधु साध्विति काकुत्स्थं ते शशंसुर्मुहुः
व १९ इत्यार्षे उत्तरकांडे पंचसप्ततितमः सर्गः ७५ प्रथमपादे शिरश्छेदेन वा लोज्जीवनं तस्येति १ मिथ्यावचनाभावे देवदेवलोकजिगी

ॐ
वाउ.
टी.
१५

299 अग्निपुरोगमो वायुर्देवस्मानन्तर्हिताः ५ पुष्पवृष्टेः प्रपंचनं दिव्यानामिति पपात वृष्टिरितिपोषः ९ किं नाम सुरकार्यं तत्राह स्व
र्गभागीति हियतः शूद्रस्तपसा स्वर्गं न ईहे सोसि त्वया हतस्तपो निहर्तं तेन स्वर्गभाग्जातः अतो देवकार्यं कृतमिति भावः ८ पर्वं वरं मे
दिशत यत्तद्वरदानमेव मम मे सितमितत्वया न ममेति शृणु तन्मे १० वैवस्वततनयं मम सदने ॥ तेन वसन्तं जीवयिष्यामीत्यपर्थीम

पुष्पवृष्टिर्महत्यासीद्दिव्यानां ससुगंधिनां पुष्पाणां वायुमुक्तानां सर्वतः प्रपपात ह ९ सुप्रीतास्त्व
ब्रुवन्राम देवाः सत्यपराक्रम सुरकार्यमिदं देव सुकृतं ते महामते १० गृहाण च वरं सौम्य यं त्वमिच्छ
स्यरिंदम स्वर्गभाङ्न हि शूद्रोयं त्वत्कृते रघुनंदन ११ देवानां भाषितं श्रुत्वा रामः सत्यपराक्रमः उ
वाच प्रांजलिर्वाक्यं सहस्राक्षं पुरंदरं १२ यदि देवाः प्रसन्ना मे द्विजपुत्रः स जीवतु दिशन्तु वरमेतं
मे ईप्सितं परमं मम १३ ममापचाराद्बालोसौ ब्राह्मणस्यैकपुत्रकः अप्राप्तकालः कालेन नीतो
वैवस्वतक्षयं ॥ तं जीवयथ भद्रं वो नानृतं कर्तुमर्हथ द्विजस्य संश्रुतोर्थो मे जीवयिष्यामि
ते सुतं १५ राघवस्य तु तद्वाक्यं श्रुत्वा विबुधसत्तमाः प्रत्यूचू राघवं प्रीता देवाः प्रीतिसमन्वितं १६
तत्र चंद्रकांताख्या पुरी दिनेनावेशिता ९ सुदुराधर्षा रामादयो अभिषेकं चक्रिरे अंगदचंद्रकेत्वोरिति शेषः १०

369 तथैवाष्यचंद्रकेतसमीपेइतिशेषः १४ नजज्ञातेनावगतवंतौ स्थिरार्थः १५ दशसहस्राणिआयुस्तेकादशसहस्राणीतिस्पष्टमेव १६ धर्मे १०२
उ॰ प्रयतमानधनपुरेअयोध्यायां अयोध्यामथुरामायाकाशीकांचीअवंति पुरीद्वारावतीचैवसप्तैतामोक्षदायकाइतिस्मृते १७ इत्यार्षेउत्तरसर्गः
रा॰ अभिषिच्यकुमारौद्वौप्रस्थाप्यसमाहितौ अंगदंपश्चिमांभूमिंचंद्रकेतमदङ्मुखं ॥ अंगदंचापि
टी॰ सौमित्रिर्लक्ष्मणोनुजगामह चंद्रकेतोस्तुभरतःपार्ष्णिग्राहोबभूवह १२ लक्ष्मणस्त्वंगदीया
१८५ यांसंवत्सरमथोषितः पुत्रेस्थितेदुराधर्षेअयोध्यांपुनरागमत् १३ भरतोपितथैवाष्यसंवत्सरम
तोधिकं अयोध्यांपुनरागम्यरामपादावुपासतः १४ उभौसौमित्रिभरतौरामपादावनुव्रतौ
कालंगतमपिस्नेहान्नजज्ञातेतिधार्मिकौ १५ एवंवर्षसहस्राणिदशतेषांययुस्तदा धर्मेप्रय
तमानानांपौरकार्येषुनित्यदा १६ विहृत्यकालंपरिपूर्णमानसाःश्रियावृताधर्मपुरेचसंस्थि
ताः त्रयःसमिद्धाहुतिदीप्ततेजसोहुताग्नयःसाधुमहाध्वरेत्रयः १७ इत्यार्षेउत्तरकांडेद्व्युत्तरशततमः १०२
कस्यचित्त्वथकालस्यरामेधर्मपथेस्थिते कालस्तापसरूपेणराजद्वारमुपागमत् १

अथरामायस्वीयवैकुंठधामागमनकालनिवेदनायब्रह्मणाप्रहितप्रेषणंकस्यचिदिति कस्यचित्कालस्यापगमनानंतरमितिशेषः
रामेधर्मपथेस्थितकालस्तापसरूपेणराजद्वारमुपागमत् १ १८५

370 ऋतिवक्लग्रस्य महर्षेः जगत्सां तारूपत्वाच्चतुर्वेदस्वरूपत्वाच्च वस्त्रानि वलो महर्षिः २ उभौ लोकौ जयस्वेत्युक्त्वा परलोकप्रवेशकालस्तु वनं ५
तस्य वाक्यधृक य स्महत स्मस्मा तथा रीत्यर्थः ५ तेजोभिरित्येतत्पदे शेरीरकांतिकिरणप्रतिपादकं इति न पुनरुक्तिः ८ ग्रसन्यस्य तदहत

सोऽब्रवील्लक्ष्मणं वाक्यं धृतिमन्तं यशस्विनं । मां निवेदय रामाय संप्राप्तं कार्यगौरवात् १ दूतो ह्यति-
बलस्याहं महर्षेरमितौजसः । रामं दिदृक्षुरायातः कार्येण हि महाबलः २ तस्य तद्वचनं श्रुत्वा सौ-
मित्रिस्त्वरयान्वितः । न्यवेदयत रामाय तापसं तं समागतं ३ जयस्व राजधर्मेण उभौ लोकौ महाद्यु-
ते । दूतस्त्वां द्रष्टुमायातस्तपसा भास्करप्रभः ४ तद्वाक्यं लक्ष्मणेनोक्तं वै श्रुत्वा राम उवाच ह । प्रवेश्य-
तां मुनिस्तात महौजास्तस्य वाक्यधृक् ५ सौमित्रिस्तु तथेत्युक्त्वा प्रावेशयत तं मुनिं । ज्वलन्तमिव ते-
जोभिः प्रदहंतमिवांशुभिः ६ सोऽभिगम्य रघुश्रेष्ठं दीप्यमानं स्वतेजसा । ऋषिर्मधुरया वाचा वर्द्ध-
स्वेत्याह राघवं ७ तस्मै रामो महातेजाः पूजामर्घ्यपुरोगमां । ददौ कुशलमव्यग्रं प्रष्टुं चैवोपचक्रमे
८ पृष्टश्च कुशलं तेन रामेण वदतां वरः । आसने काञ्चने दिव्ये निषसाद महायशाः ९ तमुवाच ततो गतं ते
महात्मने । प्रापयास्य च वाक्यानि यतो दूतस्त्वमागतः १० चोदितो राजसिंहेन मुनिर्वाक्य-
मस्य वाक्यानि संदेशवाक्यानि प्रापय स्मृति वेदय इति तत्तथं तोऽदूतः शति १० दृष्टेरहस्यो दिनं वेयथर्वेदसे हि वादानामिति शेषः देवगोप्यगोपते हि

स्मस्मन ईर्ष्योदिति मन्यन्ते संहितायोर्विवक्षा

देवानां हितं संभवतीति भावः ॥

37) नैतावदेव किं त्वन्यापि प्रतिज्ञा कार्येत्याह य इति यः शृणोति तस्य नह वचनं निरीक्षेद्वा मं त्र वितारो वेति शेषः स तव वध्य इति कथमेवमतिह्लुवा प्रतिज्ञातन्नाह भवेदिति न स्मुनिमाख्यस्य वचनमेवं वै भवेत् उक्ते संकेते सर्वमेव हृदी सेवा भवदिति अर्थः यद्यवेक्षसे तत्परिपालनमिति

उ॰ रा॰ टी॰ १८९

शेषः १२ प्रतिहारं द्वारपालं विसर्जयान्यतोपसारय १३ किमर्थं तन्नाह स मे इति सौमित्रे मम ऋषेश्च द्वंद्वेरहस्यं वाक्यं यः शृणुयात्स्यन्नौ

यः शृणोति निरीक्षेद्वा स वध्यो भविता तव भवेद्धि मतिमाख्यस्य वचनं यद्यवेक्षसे ११ तथेति च प्रतिज्ञाय रामो लक्ष्मणमब्रवीत् द्वारि तिष्ठ महाबाहो प्रतिहारं विसर्जय १२ स मे वध्यः खलु भवेद्वाचं द्वंद्वसमीरितं ऋषेर्मम च सौमित्रे पश्येद्वा शृणुयाच्च यः १४ ततो निक्षिप्य काकुत्स्थो लक्ष्मणं द्वारिसंग्रहं तमुवाच मुनेर्वाक्यं कथयस्वेति राघवः १५ यत्ते मनीषितं वाक्यं येन वासि समाहितः कथयस्वाविशंकस्त्वं ममापि हृदि वर्तते १६ इत्यार्षे उत्तरकांडे सर्गः १०३

शृणु राजन्महासत्त्व यदर्थमहमागतः पितामहेन देवेन प्रेषितोस्मि महाबल १

पश्येद्वा स मे वध्य इति खलु समीरितं प्रतिज्ञातं १४ संग्रहं सम्यग्रक्षार्थं ग्रहणं यस्य तं १५ ते मनीषितं येन वा समाहितः प्रेषितस्त्वं त्वं मनीषितं कथयस्व ममापि हृदि वर्तते इत्यर्थः १६ इति रामायणे उत्तरकांडे सर्गः १०३ अथ ब्रह्मसंदेशकथनं शृण्विति यस्य संदेशकथनार्थमहमागतस्तं संदेशं शृणु केन चेत्येन संदेशः प्रेषितः स भगवान् पितामह एवन केवलं मत्तिरेवेत्याह पितामहेनेति १ १८९

372 नत्वेप्सितहृत्तोपहं तत्संबंधेवेत्याह तवाहं पूर्वके भावे इति पूर्वके भावे इति पूर्वोक्तस्याभावे इति पूर्वावस्थायां हिरण्यगर्भोत्पत्तिसमये हिर
ण्यगर्भावस्थायां वा कथमहं पुत्रस्तत्राह मायासंभावितः मायया संकल्पेन संभावितः मायया संकल्पेन संभावित उत्पादितः सर्ववस्तुसं
हारकत्वेन नितीर्थः कालत्वात्तवाहं पूर्वं संज्ञावेइतिपाठः पूर्वं सृष्टेः प्राक्सदेव सोम्येदमग्र आसीदिति श्रुतेः सत्तारूपब्रह्मभावेक
र्ष्यमाणमखिलसंसारस्य सृष्टिस्थितिसंहारानुग्रहानुग्रहलक्षणपंचकृत्यनिर्वाहकः कालाख्यः क्षणघटारूपः नाडिदिनपक्षादिविभा
गनिर्वाहकः पुत्रो मायासंभावितस्त्वदीयमायापरिणामरूपोर्थः शेषं प्राग्वत् यद्यपि ब्रह्मा हिरण्यगर्भो गणविस्तारवान् तथापि त
स्य स्वस्वरूपांशेनाहं तज्जातत्वाद्ब्रह्मदेववदेवं व्यपदेशो न दोषस्तस्मादाह यत्तत्कनकेन सज्ज्ञावशाद्ब्रह्मेन हिरण्यगर्भ उक्तस्तत्र छेमितिस्य

तवाहं पूर्वके भावे पुत्रः परपुरंजय। मायासंभावितो वीर कालः सर्वसमाहरः २ पितामह
श्च भगवानाह लोकपतिः प्रभुः। समयस्ते कृतः सौम्य लोकान्संपरिरक्षितुं ३

इमे वाहेतनविद्यावदो २ एवं स्वस्वरूपमुक्त्वा संदेशमाह पितामहश्चेति चतुर्मुखजातानां प्रजापतीनां लोकपितृत्वाच्चतुर्मुखः पिता
महः स लोकानां भूरादीनां पतिः पालयिता महयदाहं तदाह दामीतिशेषः तदेवाह समयस्त इति भवंतं विगततत्त्वराः स तो ब्रह्मसंदेशः
लोकान्देवमनुष्यादीन्रावणादिनो रक्षितुं यः समयः कृतः दशवर्षसहस्राणि दशवर्षशतानि च वत्स्यामि मानुषे लोके पालयन्पृ
थिवीमिमामित्येवं रूपकालविषयः कृतः संप्रति इति शेषः ३ अथ तत्त्वतो ज्ञातस्वत्स्वरूपस्य मम कथं मानुषदेहपरिग्रहस्तत्र
संप्रयोजनं नान्यत्क्रियामाह संक्षिप्येति पुरा जगतः सृष्टेः पूर्वकाले मायया सर्वसंहारकस्य पणात्मा संक्षिप्य उपसंहृत्य पत्नेना प्रयासेन संम

373 हारकत्वं वक्तव्यं तत्र ममैव संस्वयमेवेत्यनेनास्य संहारस्य रुद्रादिद्वारकत्वे तेषामपि संहार्यकोटिनिविष्टत्वादिति दर्शितं एवं संहारं कृत्वा सह
डों॰ देहकार्यं च तत्त्मान्नाद्विसृष्टिद्वारेणैवं ता सृष्टिं करोति तद्रूपे महार्णवे शयानः स्वनेनैवोदकमायितेलक्षेषु न तदपि स्वत्ति तदा पृथिवी
वाउ॰ तत्वाद्यभावप्रदर्शनार्थः मां समुद्रे वमजीजनः यो ब्रह्माणं विदधाति पूर्वमिति श्रुतेः हिरण्यगर्भसृष्टिद्वारा ब्रह्माण्डसृष्टौ क्रियमाणा
टी॰ यां तदंशात्मको भूदस्त्वयर्थः ४ तदुत्पत्तिप्रकारमाह भोगवंतमिति ततः प्रसस्त्वभूयस्त्वत्तः सं भोगवंतं प्रधानभोगं शयानं नारायणं
१८७

संतिप्रदिष्टुरालोकान्मायया स्वयमेव हि महार्णवे शयानोऽपमां तं पूर्वमजीजनः ४ भोग
वंतं ततो नागमनंतमुदकेशयः मायया जनयित्वाद्वौ च सत्वौ महाबलौ ५ मधुं च कैटभ
चैव ययोरस्थिवयैर्वृत्ता इयं पर्वतसंबाधा मेदिनी चाभवत्तदा ६

नागमुदके शयो मायया जनयित्वा तत्रैव निर्माय स्थापयित्वा त उरगे शयनं वा स्वरूपः अथ कर्दमप्रायमू विग्रहे स्थितो शायी
नोऽजीजनः ५ कौतौ तत्राह मधुं चेति तत्र मधुर्मेदः प्रधानकैटभो स्थिप्रधानः तत्सृष्टिप्रयोजनमाह ययोरित्यादि ययोर्वृथा
नंतरं इयं निर्मितासीता पर्वतसंबाधा मेदोपक्रम तयाह द्वाश्रुतमत्ववित विग्रथम्भस्मदेणयुक्त तयामेदिनीति नाम्नाभूत एवं च तस्यास्तु
जासर्गयोग्यतासिदा ६ १८७

374 अथवक्तुरीश्वरस्तुतिः पद्मेश्वरेति ततः स्वनिर्मितोरजोमायस्यविश्वस्यनाभिप्रदेशेऽर्कसंकाशंसर्वप्रभंदिव्यंपद्ममुत्पाद्यतस्मिन्दिव्येपद्मेमांच
तत्रैवमुत्पाद्यप्राजापत्यंसृष्टिरूपंकर्ममयितयानिवेशितमित्यन्वयमेभ्यनायतिरितिनाम ॰ ततःसोहंत्वयासृष्टस्त्वद्भागः स्वकार्यसृ
ष्टिलक्षणंसंपादयतत्तदक्षणमयपद्मजगत्पतिंत्वामुपास्यपतोभवान् ममतेजस्करः सृष्टिसमर्थज्ञानक्रियाशक्तिमयतेजः प्रदोभ
तस्मामेवभूतेषुरक्षाविधानत्वेतिमार्थितवानितिशेषः ८ ततोहेतोः रक्षणस्यसर्वप्राणमयेवनिवेषितत्वात्हेतोः दुर्धर्षात्तस्माद्

पद्मेदिव्येर्कसंकाशेनाभ्यामुत्पाद्यमामपि प्राजापत्यंत्वयाकार्यमपिसर्वंनिवेशितं ॰
सोहन्यस्तभागेद्दिवामुपास्यजगत्पतिं रक्षाविधत्स्वभूतेषुममतेजस्करोभवान् ८
ततस्त्वमपिदुर्धर्षात्तस्माद्भावात्सनातनात् रक्षार्थंसर्वभूतानांविष्णुत्वमुपजग्मिवान्
अदित्यांवीर्यवांस्तत्रभ्रातॄणांवीर्यवर्धनः समुत्पन्नेषुकृत्येषुतेषांसाहाय्यकल्पसे ९

वात्वक्तव्यभूतानांप्रेष्ठेननकोऽहंइतिस्पृहितमितिदुर्धर्षात्संभ्रमलस्याभावात्सत्स्वनातनात्सकलकारणत्वेनकालापरिच्छे
द्यात्त्रिगुणामहतत्त्वाख्यहैरण्यगर्भभावात्त्वत्प्राधान्येनविष्णुत्वमागमवान् ९ ततः अदित्यांवीर्यवान् अत्रोभ्रातृणामदि
तिपुत्रेन्द्रादीनांवीर्यवर्द्धनउपेन्द्राख्योऽभूः सचतत्कृत्यकालेतेषांसाहाय्यकल्पसे १०

375 अतः सर्वं सकलप्रजारक्षणे कृत्य उपेंद्रः संप्रति रावणेन प्रजासु हिंस्यमानासु हे जगतो: वर जगच्छ्रेष्ठ स्वयमेव सर्वलोकानुग्रहाय राव
यो॰ णस्य वधाकांक्षी भूत्वा दशवर्षसहस्राणि दशवर्षशतानि च वासस्य नियमे परिच्छेदं कृत्वा आत्मना स्वयमेव कृत्वा मानुषेषु मानुषभावेषु
वा॰ मनो दधाः ११ सर्वं मानुषेषु मनोमयः स्वसंकल्पमयः स्वसंकल्पादेव कस्य वित्स्वभावो जातः स च नत्वर्णायुः पूर्णात्वमित्यर्थः यद्वा श्रीम
टी॰ दादिगुरोस्त्वतीयवस्त्र्णाय स्वभासा सर्वमिदं विभातीत्यादि श्रुति सिद्धस्य संकल्पमयो ज्येष्ठपुत्रो हिरण्यगर्भः कार्यब्रह्मरूपस्त्वद
१८८

सहिंस्यमानासु प्रजासु जगतो वर रावणस्य वधाकांक्षी मानुषेषु मनो दधाः ११ दशवर्ष
सहस्राणि दशवर्षशतानि च कृत्वा वासस्य नियमं स्वयमेवात्मना पुरा १२ सर्वं मनोमयः पुत्रः पूर्
णायुर्मानुषेष्विह कालेन रवश्रेष्ठ समेपमुपवर्तितं १३ यदि भूयो महाराज प्रजा इच्छस्युपा
सितुं वस वा वीर भद्रं त एवमाह पितामहः १४ अथवा विजिगीषा ते स्वर्लोकाय राघव स
नाथा विष्णुना देवा भवंतु विगतज्वराः १५

भिमनस्व तत्त्वभूतेन स्वलोकप्राणानाहत त्वात: स्वसंकल्पादेव मानुषेष्वपि कस्य वित्स्वभावस्य त्रापि पूर्णायुर्जातोऽयं देवमनो हे नरश्रेष्ठ अयं काल
लेसमीपागमस्या पवर्तितं विज्ञायपितं प्रेषित इति भावः १३ अस्मत्कसमे तावत् अतः परं त्वं न त्राता यदि भूयोऽपि प्रजा उपासितुमिह
स्थित्वा रक्षितुमिच्छसि तदा हे वीर राम वस १४ अथवा अथ चेत्त्वहतनियमं मगीकृत्य स्वर्लोकाय विजिगीषा स्वर्लोकपाल
यितुं यदीच्छा तदा उपेंद्ररूपेण विष्णुना देवाः सनाथा विगतज्वरा भवंतु इत्येवं पितामहः आहेत्यन्वयः १५ १८८

376 कालसमीरितं ह्यनन्तरूपकालेनोक्तं प्रहसन्निति प्रहसमेव स्वकृतमर्यादानतिक्रमाभिप्रायार्थं संभ्रमः पितामहस्येतिहासः सर्वसंहारं काले ॥१॥
देवदेवस्य सर्वदेवोपास्यस्य परममद्भुतं परमं मदभिप्रायप्रकाशकत्वात् वाक्यं श्रुत्वा महती प्रीतिर्जाता तत्रागमनसंभवा वा मदन्ते प्रीतिर्जा
ता ॥२॥ एवं संदेशानुमोदनेन हृष्टता प्रतिसंदेशमाह त्रयाणामिति त्रयाणां भूर्भुवः स्वर्गलोकानां कार्यार्थं प्रतिज्ञनेन मम स्वेच्छामूलः संभव
इति सर्वाप्यवगम्यते यथातत्त्वं ह्येष यथार्थं पिनद्धमनुरूपं प्रवहतो पिशात्मानं जानात्येव तद्वत् सोऽहं यतः यस्माल्लोकादिहागत

श्रुत्वा पितामहेनोक्तं वाक्यं कालसमीरितं राघवः प्रहसन्वाक्यं सर्वसंहारमब्रवीत् ॥१॥ श्रु
त्वा मे देवदेवस्य वाक्यं परममद्भुतं प्रीतिर्हि महती जाता त्वागमनसंभवा ॥२॥ त्रयाणामपि लो
कानां कार्यार्थं मम संभवः भद्रं तेऽस्तु गमिष्यामि यत एवाहमागतः ॥३॥ हृद्गतो ह्यसि संप्रा
प्तो न मेऽत्र विचारणा मया हि सर्वकृत्येषु देवानां वशवर्तिना ॥४॥ ह्स्मोर्षे वचः पातनमः ॥४
तथा तयोः संवदतोर्दुर्वासा भगवानृषिः रामस्य दर्शनाकाङ्क्षी राजद्वारमुपागमत् ॥

स्तमेव गमिष्यामि ॥३॥ हे सर्वसंहाररूपकाल त्वं मे हृद्गत एवं प्राप्तोऽसि प्राप्तस्तत्र गमने विचारणा नास्ति हृद्गतो ह्यसि संप्राप्त इति पाठे
योऽभावो मम मरुद्गतः शुद्धवत्स्वात्मकः प्राप्तस्तेन सम मेमा सम्प्राप्तो ऽसि तत्र मे ननु तर्हि तिदेवशाप्यतो किमिति नोर्ध्वं दिलोकगमने
नत आह मया हीति वशवर्तिना सर्वकृत्येषु स्थातव्यमतो यथा पितामहस्तथा करिष्यामीति शेषः वशवर्तिनेति त्वनीयान्तपाठे दे
वानां सर्वकृत्येषु पितामहस्य वशवर्तिनास्थातव्यमित्यर्थः प्रजारक्षणोद्देशपाकतयः कालिकमर्यादाप्रदानादिति भावः ॥४॥ अध्यायः १०४

३७७ एवंहंहकथासमयेकालात्मकभगवत्प्रेरणायाद्दुर्वाससआगमनंतरंतथेति १ मर्थोतिवर्ततेतिकामतिप्रतः प्रागपूर्वमेवप्रणीहं राम
दर्शय: २ किंकार्यंकर्त्तव्यंकोर्थः किंप्रयोजनंकिंकरोमितिवर्तमानसामीप्येलट्हकिकरिष्येकस्तमेवंसंकटकालस्तत्राहव्यग्रो

सोभिगम्यतुसौमित्रिमुवाचऋषिसत्तमः रामंदर्शयमेशीघ्रंपुत्रमेर्थोतिवर्तते २ श्रुत्वातुलक्ष्मणः
वितेषुश्रुत्वालक्ष्मणःपरवीरहा अभिवाद्यमहात्मानंवाक्यमेतदुवाचह ३ किंकार्यंब्रूहि
भगवन्कोवार्थः किंकरोम्यहं व्यग्रोहिराघवोब्रह्मन्मुहूर्तंपरिपाल्यतां ४ तच्छ्रुत्वाऋषि
शार्दूलः क्रोधेनकलुषीकृतः उवाचलक्ष्मणंवाक्यंनिर्दहन्निवचक्षुषा ५ अस्मिन्क्षणेमां
सौमित्रेप्रख्याकेयाचसन्ततिः नहिशक्ष्याम्यहंभूयोमन्युंधारयितुंहृदि ६ तच्छ्रुत्वाघोरसं
काशंवाक्यंतस्यमहात्मनः चिंतयामासमनसावाक्यस्यतस्यनिश्चयं ७ एकस्यमरणंमेस्तु
माभूत्सर्वविनाशनं इतिबुद्ध्याविनिश्चित्यराघवायन्यवेदयत् ८ लक्ष्मणस्यवचःश्रुत्वारा
मःकालंविसृज्यच निःसृत्यत्वरितोराजाअत्रेःपुत्रंददर्शह ९ सोभिवाद्यमहात्मानंज्वलंतमि
वतेजसा किंकार्यमितिकाकुत्स्थःकृतांजलिरभाषत १०

हीति ४ रामायप्रतिवेदयदिनप्रतिवेदयेस्तर्हिविषयादिकशापेमर्थः ६ एकस्यमरणमस्त्वदहमध्यपुरुषांतरसंदर्शकत्वेनय
याप्रतिज्ञमभवस्यप्रामतादितिभावः ९ १० ॥

378 वर्षसहस्रस्य अनशननियमपरिगृहीतवर्षसहस्रस्यैत्यर्थः यथासिद्धं यथोपपन्नं १३ राघवः प्रीतमानसः मुनिकोपः परिहृत इति शम
संतोषः १४ ततोनेतरं कालवाक्यानि मन्त्रश्रोतृराघवयोर्दृष्टुः अवधविषयकाणि १६ कालवाक्यानि बुध्या निबुध्यानि बुध्यानि निश्चित्य अस्यात्रव

तद्वाक्यं राघवेणोक्तं श्रुत्वा मुनिवरः प्रभुः प्रत्याह रामं दुर्वासाः श्रूयतां धर्मवत्सल १२ अद्य वर्षस
हस्रस्य समाप्तिर्मम राघव सोऽहं भोजनमिच्छामि यथासिद्धं तवानघ १३ तच्छ्रुत्वा वचनं राजा रा
घवः प्रीतमानसः भोजनं मुनिमुख्याय यथासिद्धमुपाहरत् १४ स तु भुक्त्वा मुनिश्रेष्ठस्तदन्नम
मृतोपमं साधु रामेति संभाष्य स्वमाश्रममुपागमत् १५ संस्मृत्य कालवाक्यानि ततो दुःखमु
पागमत् दुःखेन च सुसंप्राप्तः स्मृत्वा तान् घोरदर्शन १६ अवाङ्मुखो दीनमना व्याहर्तुं न शशा
क ह ततो बुध्या विनिश्चित्य कालवाक्यानि राघवः १७ नैतदस्तीति निश्चित्य तूष्णीमासीन्महा
यशाः १८ इत्यार्षे उत्तरकाण्डे सर्गः १५ अवाङ्मुखमथो दीनं दृष्ट्वा सोममिवाप्लुतं राघवं लक्ष्म
णो वाक्यं हृष्टो मधुरमब्रवीत् १ न संतापं महाबाहो मदर्थं कर्तुमर्हसि पूर्वनिर्माणबद्धा हि का

गेस्योपसंहारः कालप्राप्तं दुविनपवेतिनिश्चित्य १७ तन्मम भ्रातृस्पत्यादि सर्वं नास्तीति चनिश्चित्य तूष्णीमासीत् १८ इति उत्तरकाण्डे
सर्गः १५ अथ लक्ष्मणविसर्जने अवाङ्मुखमिति ग्रासनंतरा उत्सुसंस्पृष्टः सर्वं श्वाकं तिः सर्वमेव रावणकर्म अस्य परित्यागस्यावगत

श्री॰
रा॰
टी॰
१८५

379 न देवाह सर्वेति सर्वनिर्माणेन ब्राह्मणीयकर्मणा वह्नाकल्पिताः हर्षीसंयोगं तामरणं तं च जीवितमित्युपदिष्टस्यापवर्तीत्यर्थः २
प्रचलितेंद्रियः सक्तो वाक्सुखमौनतया प्रकृतव्यापारः ५ सुसमासनमासीत्स्थिताः ७ हृष्टमेतत्त्वयं त्वयैव दृष्टः मया तयोर्वनेनैव

जहि मां सौम्य विस्रब्धं प्रतिज्ञां परिपालय हीनप्रतिज्ञाः काकुत्स्थ प्रयांति नरकं नराः यदि प्रीति
र्महाराज यद्यनुग्राह्यता मपि जहि मां निर्विशंकस्त्वं धर्मं वर्धय राघव ५ लक्ष्मणेन तथोक्तस्तु
रामः प्रचलितेंद्रियः मंत्रिणः समुपानीय तथैव च पुरोधसः ५ अब्रवीच्च तदा वृत्तं तेषां मध्ये नरा
धिपः दुर्वाससोऽभिगमनं चैव प्रतिज्ञां तापसस्य च ८ तच्छ्रुत्वा मंत्रिणः सर्वे सोपाध्यायाः समासतः
वसिष्ठस्तु महातेजा वाक्यमेतदुवाच ह ७ दृष्टमेतन्महाबाहो क्षयं ते रोमहर्षणं लक्ष्मणेन
वियोगश्च तव राम महायशः ८ त्यजैनं बलवान्कालो मा प्रतिज्ञां वृथा कृथाः प्रतिज्ञायां हि
नष्टायां धर्मो हि विलयं व्रजेत् ९ ततो धर्मे विनष्टे तु त्रैलोक्यं सचराचरं सदेवर्षिगणं सर्वं विनश्ये
त्तु न संशयः १० स त्वं पुरुषशार्दूल त्रैलोक्यस्याभिपालनात् लक्ष्मणेन विना चाद्य जगत्स्वस्थं कुरु

जिशेषः मां हृष्टां रामतेन त्वत्प्रियार्थस्य महाश्रमस्य दुर्वाससो मुखावाचेति ८ त्यजेत्यादिना प्रतिज्ञापालनं धर्मः क्षत्रियस्य विशेषत
इति सूचितं ९ अभिपालनात् अभिरक्षणसिद्धिहेतोः लक्ष्मणेन विना चाद्य लक्ष्मणत्यागपूर्वकं मयावस्थानेनेत्यर्थः ॥ १२ १८५

380 इष्टस्य त्यागो वा वधो वा तदुभयं साधनं मम मे वेत्ति त्वो विसर्जयेव यप्रतिज्ञापालनायेति भावः १३ रामेण भाषीतः इति डक्तरीत्येति शेषः वा
ष्पव्याकुलितेंद्रियः रामवियोगासहिष्णुतया नतु सभयेनेति भावः तदेवा स्वगृहं न प्रविवेश हे तिशयात् मरणं तीव्रमिति पाठः १४ सर्वे
स्रोतांसि सर्वेंद्रियद्वाराणि १५ युक्तं योगयुक्तं अभ्यकिरन् अभिहृष्टवंतः १६ ग्रहश्यं योगवलादंतर्धानमुपगतं यद्वाः दृश्यं यथा सशरी
रं तल्लक्ष्मणमगस्त्यशक्रं सिदिवं संविवेश अतेन मनुष्यशरीरसंस्थानमेव देवशरीरसंस्थानं प्रापितन तु पूर्वशरीरेण रपरिग्रह इत्युक्तिस्तु चिन्तय

विसर्जयेत्वां सौमित्रे मा भूद्धर्मविपर्ययः त्यागो वधो वा विहितः साधूनां उभयं समं रामेण भाषिं
ते वाक्ये वाष्पव्याकुलितेंद्रियः लक्ष्मणस्त्वरितः प्रायात्स्वगृहं न विवेश ह सगत्वा सरयूतीरमु
पस्पृश्य कृतांजलिः निगृह्य सर्वस्रोतांसि निश्वासं न मुमोच ह अनिश्वसंतं युक्तं तं सशक्राः सा
प्सरोगणाः देवाः सर्षिगणाः सर्वे पुष्पैरभ्यकिरंस्तदा अदृश्यं सर्वमनुजैः सशरीरं महाबलं प्र
गृह्य लक्ष्मणं शक्रो दिवं संविवेश ह ततो विष्णोश्चतुर्भागमागतं सुरसत्तमाः हृष्टाः प्र

नेन जन्मापि तत्थैवेति च स्मर्तव्यं १७ चतुर्भागं च तुर्थं भागं अकतक शेषस्य पूर्णविभक्तेनैः शेषः स्यापीति लः स्वहृस्य चतुर्भाग
गवान् तत्र शेषांशो लक्ष्मणः गरुडांशो भरतः विस्वक्सेनांशः शत्रुघ्न इति इदं पाद्यविरुद्धं तत्र हि भरतशत्रुघ्नौ पांचजन्यांशौ
स्मृतमिति पाद्यदर्शितं तदस्य स्वरूपेणोक्तराम सविधे आगमनमुक्तं युद्धकांडे न विरुद्धं च १८ इति श्रीरामायणे युद्धकांडे सर्गः १०९
॥ ॥

उ०कां० १०९

[illegible]

अथ भरतवचनेन कुशलवयो राज्याभिषेकपूर्वं प्रस्थापनं शत्रुघ्नाय दूतप्रेषणं च विसृज्येति १ भरतमयोध्यायाः पतिमभिषेक्ष्यामी-
ति मनोरथं करोमि ततोहं वनं यास्यामि महाप्रस्थानविधिनेति शेषः २ संभारानभिषेक्ष्यामीति शेषकार्यान् ३ त्वां विना यथा
राज्यं त्वदृते यथा यथानुक्रमं माममयोध्याराज्यं न कामये त्वां विना प्राप्येन स्वर्गभोगेन च न कामये सुखभोगमिति शेषः हे राजन्निम

विसृज्य लक्ष्मणं रामो दुःखशोकसमन्वितः पुरोधसं मंत्रिणश्च नैगमांश्चेदमब्रवीत् १
अद्य राज्येभिषेक्ष्यामि भरतं धर्मवत्सलं अयोध्यायाः पतिं वीरं ततो यास्याम्यहं वनं २ प्रवेशयत सं-
भारान्माभूत्कालात्ययो यथा अद्यैवाहं गमिष्यामि लक्ष्मणेन गतां गतिं ३ तच्छ्रुत्वा राघवेणो-
क्तं सर्वाः प्रकृतयो भृशं मूर्धभिः प्रणता भूमौ गतसत्वा इवाभवन् ४ भरतश्च विसंज्ञोभूत्
श्रुत्वा राघवभाषितं राज्यं विगर्हयामास वचनं चेदमब्रवीत् ५ सत्येनाहं शपे राजन्स्वर्गभोगेन
चैव हि न कामये यथा राज्यं त्वां विना रघुनंदन ६ इमौ कुशीलवौ राजन्नभिषिंच नराधिप
कोशलेषु कुशं वीरं उत्तरेषु तथा लवं ७ शत्रुघ्नस्य च गच्छंतु दूतास्त्वरितविक्रमाः इदं गमनम-

मर्थै सत्येन शपे ६ तर्हि किं राज्यमेवास्तु नेत्याह इमाविति उत्तरकोशलेषु ७ इदमस्माकं प्रवर्तमानं मनोद्योगं शत्रुघ्नस्याख्यातुं कथ-
यितुं मा चिरं विलंबं यथा भवति तथा दूता गच्छंतु आख्यांतु मा चिरमित्यत्र मकारानुस्वारलोप आर्षः ८

382 पद्मानीप्सितं ज्ञात्वा यत्कार्यं यत्कारणादेन कर्तव्यं १० प्रवृत्तो जनमित्यत्र दीर्घश्चार्षः ११ हे राम यत्र त्वं गमिष्यसि तत्र गच्छन्तं त्वामनु
गच्छामः १२ सत्यर्थं त्वया गम्यमाने स्वर्गमार्गमित्यर्थः १३ वयं न देकशरण्याय दितिनत्याज्यास्तदा गम्यमानतपोवानयास्यनमेतः

तं गच्छन्तं भारतेनोक्तं दृष्ट्वा चापि स्वयंभुवान् पौरान् दुःखितं सन्नत्वान् वसिष्ठो वाक्यमब्रवीत् ९
वत्स राम भ्रमाः पश्य धरणीं प्रकृतीर्गताः ज्ञात्वैषामीप्सितं कार्यं मा चैषां विप्रियं कृथाः १० वसि
ष्ठस्य तु वाक्येन उत्थाप्य प्रकृतेर्जनं किं करोमीति काकुत्स्थः सर्वान्वचनमब्रवीत् ततः सर्वाः
प्रकृतयो राममेवचनमब्रुवन् गच्छन्तमनुगच्छामो यत्र राम गमिष्यसि १२ पौरेषु यदि ते प्रीतिर्य
दि स्नेहो ह्यनुत्तमः सपुत्रदाराः काकुत्स्थ समं गच्छाम सत्पथं १३ तपोवनं वा दुर्गं वा नदीमंभोनिधिं
तथा वयं ते यदि न त्याज्याः सर्वान्नो नय ईश्वरः १४ एषा नः परमा प्रीतिरेष नः परमो वरः हृद्गतानः
सदा प्रीतिस्तवानुगमने नृप १५ पौराणां दृढभक्तिं च बाढमित्येव सोऽब्रवीत् स्वकृतान्तं चान्ववे
क्ष्य तस्मिन्नहनि राघवः १६ कोशलेषु कुशं वीरमुत्तरेषु तथा लवं अभिषिच्य महात्मानावुभौ रामः
कुशीलवौ १७

सर्वान्नयत इह तरी प्रवृत्ति भरा वदतारत्वात्सर्वस्वभक्तलोकनयनसमर्थोऽयतस्त्वमित्यर्थः १४।१५ पौराणामनुगमनविषयो दृ
ढभक्तिमन्वेक्ष्य स्वकृतान्तं स्वकर्म व्यसिद्धान्तं वान्वेक्ष्य बाढमित्यब्रवीत् १६ अभिषिच्य प्रस्थापयामासेति शेषः १७

उ॰ रा॰ टी॰ १९२

383 पुरे योध्यायां स्वयमीपे कोसलहृदयराज्यार्थमभिषिक्तौ सुतावंके प्रतिष्ठाप्य परिष्वज्य मूर्ध्न्यावघ्राय च रथादिकं ददौ १८ इत्यार्षे सर्गः १०१
स्त्रुघ्नानुगमपागता मा शत्रुघ्नसुग्रीवविभीषणाद्दीनामनुगमनावस्थानेहताः इति १ राघवस्य प्रतिज्ञाकालस्फुरं प्रतिवस्सलोकाममम

पुभिषिक्तौ सुतावंके प्रतिष्ठाप्य पुरे ततः रथानां तु सहस्राणि नागानामयुतानि च दशचाश्वस
हस्राणि एकैकस्य धनं ददौ १८ बहुरत्नौ बहुधनौ हृष्टपुष्टजनावृतौ स्वे पुरे प्रेषयामास भ्रा
तरौ तौ कुशीलवौ १९ अभिषिच्य ततो वीरौ प्रस्थाप्य स्वपुरे तदा दूतान्संप्रेषयामास शत्रुघ्नाय
महात्मने २० इत्यार्षे उत्तरकाण्डे सर्गः १०१ ते दूता रामवाक्येन चोदिता लघुविक्रमाः प्रजग्मु
र्मधुरां शीघ्रं चक्रुर्वासं न चाध्वनि १ ततस्त्रिभिरहोरात्रैः संप्राप्य मधुरामथ शत्रुघ्नाय यथात
त्त्वमाचख्युः सर्वमेव तत् २ लक्ष्मणस्य परित्यागं प्रतिज्ञां राघवस्य च पुत्रयोरभिषेकं च पौरानु
गमनं तथा ३ कुशस्य नगरी रम्या विन्ध्यपर्वतरोधसि कुशावतीति नाम्ना सा कृता रामे
ण धीमता ४ श्रावस्तीति पुरी रम्या श्राविता च लवस्य ह अयोध्यां विजनां कृत्वा राघवो भरत
स्तथा ५ स्वर्गस्य गमनोद्योगं कृतवन्तौ महारथौ एवं सर्वं निवेद्याशु शत्रुघ्नाय महात्मने ६ ५८

श्रीवाल्मीकीये रामायणे उत्तरकाण्डे

नप्रतिज्ञां पौरानुगमनं पौरसतिं ३ कुशस्य कुशावतीतिनाम्ना पुरी रामेण कृता ४ लवस्य च पुरी श्रावस्तीतिनाम्ना श्रावस्तीतिनाम्ना १९२

384 त्वरावमनायन्वविनोभवेतिराजतिमर्थः ~ कोवनंकोवनात्प्रेयथाहृतमब्रवीत् लक्ष्मणस्यागस्यनिर्देशककनखंकाव्याहृतमर्थमितिभा
वः ८ विपर्यासंदेहविमोगंभाविषां भविष्यंत ततपक्षस्यनानंतरं ९ वैदिशंतदाख्यनगरं धनेवपुकंकृत्वाकिंचिदधिकंज्येष्ठायव
समन्विमार्गदत्ता १० मुनिभिःसार्थमासीनमितिशेषः १२ अन्मदयवक्तव्यमामानुगछेतिवक्तव्यमित्यर्थः अतोस्माद्वाक्यादर्थं

विशेषसेततनेहताश्वराजेतिवाब्रवीत् तच्छ्रुत्वाघोरसंकाशंकुलदत्यमुपस्थितं ~ प्रकृतीश्च
समानीयकोवनेचप्रोषमं तेषांसर्वंयथावृत्तमब्रवीद्रघुनंदनः ~ आत्मानस्यविपर्यासंभ
विष्यंभ्रातृभिःसह ततःपुत्रद्वयंवीरःसोभ्यषिंचन्नराधिपः ४ सुवाहुंमथुरायांतुशत्रुघ्ना
तौवैदिशे द्विधाकृत्वाततोसेनांमाथुरींपुत्रयोर्द्वयोः धनेनपुंकंकृत्वानस्थापयामासपार्थि
वः १० सुवाहुंमथुरायांचवैदिशेशत्रुघातिनं ययोस्थाप्यतदायोध्यारथनैकेनराघवः ११ स्व
दर्शमहात्मानंज्वलंतमिवपावकं सूक्ष्मक्षौमांबरधरंमुनिभिःसार्धमक्षयैः १२ सोभिवाद्यततोरा
मंप्राञ्जलिःप्रयतेंद्रियः उवाचवाक्यंधर्मज्ञंधर्ममेवानुचिंतयन् १३ कृताभिषेकंसततराघवनंदं

कंहीवीरणामनंदडेनेमर्थः विलोक्यमानमिच्छामिनहिधेनविशेषतइतिपाठेनहिधेनपरमानुग्रहसमर्थेनविलोक्यमानमनु
गृह्यमानमनुग्रहमाणमेवत्वेच्छामिआत्मानमितिशेषइत्यर्थः विलोक्यमानमित्यर्थः अतोस्माद्वाक्यादधिकहीवीरणामनंदडेनेमर्थः
निहन्यमानमिच्छामिमहियेनविशेषतइतिपाठेहेवीरतवणामनंमहियेननिहन्यमानेनेच्छानीतिसंबंधः १५

यं नवाभ्युदयवक्तव्यमितोवीरतपानाम निह
सामान्यकिंवाशिमहर्षयर्थविषयस्तः १५

नंदन नवाकुनामवेहितम् विदिमाहितं कस्य

385 तस्य वाक्यस्य वाक्यान्ते उच्चारणान्ते इत्यर्थः १८ समागता मिलिताः २० यमदंष्ट्राग्नौ सैव तया विनिपातिताः संहृता इत्यर्थः २१
ॐ एवं तेषामनुगमनं वनं कृत्वा ब्रह्मत्वापरिपालनाय सर्वस्यामहं विभीषणमिति २४ तत्र विभीषणस्य ब्रह्मणः सरन्तु
रा॰ तस्य तां बुद्धिमक्लीबां विज्ञाय रघुनन्दनः बाढमित्येव शत्रुघ्नं रामो वाक्यमुवाच ह १७ तस्य वा
टी॰ क्यस्य वाक्यान्ते वानराः कामरूपिणः ऋक्षराक्षससंघाश्च समापेतुरनेकशः १८ सुग्रीवं ते पु
१५२ रस्कृत्य सर्व एव समागताः तं रामं द्रष्टुमनसः स्वर्गायाभिमुखं स्थितं १९ देवपुत्रा ऋषिसुता
गन्धर्वाणां सुतास्तथा रामक्षयं विदित्वा ते सर्व एव समागताः १९ तवानुगमने राजन्संप्राप्ता
माः स्म समागताः यदि राम विनास्माभिर्गच्छेस्त्वं पुरुषोत्तम २० यमदण्डमिवोद्यम्य त्वया स्म
विनिपातिताः एतस्मिन्नन्तरे रामं सुग्रीवोऽपि महाबलः २१ प्रणम्य विधिवद्वीरं विज्ञाप्य रघुस
त्तमः २२ अभिषिच्याङ्गदं वीरमागतोऽस्मि नरेश्वर २२ तवानुगमने राजन्हि मां कृतविनिश्चयं २३ १
तैरेवमुक्तः काकुत्स्थो बाढमित्यब्रवीत्स्मयन् विभीषणमथोवाच राक्षसेन्द्रं महायशाः याव
त्प्रजा धरिष्यन्ति तावत्त्वं वै विभीषण राक्षसेन्द्र महावीर्य लंकास्थः स्वं धरिष्यसि २५ यावच्चन्द्रश्च
यावत्तिष्ठति मेदिनी यावच्च मत्कथा लोके तावद्राज्यं तवास्त्विह २६ १५२
दानादिना वस्यानमेव शास्ति यावदिति प्रजा धरिष्यन्ति तावत्त्वं स्वस्थीयं देहं धरिष्यामि २५ २६

386 पूर्णोसेनेः आतमः श्रवस्थानेपरमेविरोधः तावद्रामस्वराज्यस्थः कालेममपदंवजनरस्तुक्तःप्रदेदोनस्मैस्वविस्मेषामहिलावेश्रीरंगशापि
नंस्वाचीमिक्ष्वाकुकुलदैवतं रंगविमानेआगादायकाशायाद्विभीषणाइतितदाहकिंचेतिस्वंश्लोकद्वयंप्रतिममित्यस्ये ग्रयत्नमतोपि
वक्ष्यदतामरत्नातयावद्यावद्रामकथाप्रवारंभलोकेतत्कथनाससमाथितत्वाद्युतस्थापयातिजीवतइतिजीवदवस्थानेकृतत्व

शासितश्वमसविलेनकार्येनेममशासनं प्रजाः संरक्षधर्मेणनोमनंवक्तुमर्हसि २७ किंचान्यद्व
क्तुमिच्छामिराजसेंद्रमहाबल आराधयजगन्नाथमिक्ष्वाकुकुलदैवतं २८ आराधनीयमनि
शंदेवैःसवासवैः तथेतिप्रतिजग्राहरामवाक्यंविभीषणः २९ राजाराजासमाख्यानोरा
घवाज्ञामनुस्मरन् तमेवमुक्त्वाकाकुत्स्थोहनूमंतमथाब्रवीत् ३० जीवितेकृतबुद्धिस्त्वंमा
प्रतिज्ञांवृथाकृथाः ३१ मत्कथाःप्रचरिष्यंतियावल्लोकेहरीश्वर तावद्रमस्वसुप्रीतोमद्वाक्यम
नुपालयन् ३२ एवमुक्तस्तुहनुमान्राघवेणमहात्मना वाक्यंविज्ञापयामासपरंहर्षमवाप्नुवन्
यावत्तवकथालोकेविचरिष्यतिपावनी तावत्स्थास्यामिमेदिन्यांतवाज्ञामनुपालयन् जांबवंतं
तथोक्त्वातुब्रह्मसुतंतदा

हिः कृतनिश्चयःलोपयेत्यर्थः २८ उक्तमेवार्थंस्पष्टयतिमत्कथाइति २९ वर्जयांबवतोपिब्रह्मपुत्रत्वात्ब्रह्मणोवदनामरत्वात्स्थापन
तथामैंदद्विविदयोरपिनतयोः स्विनीकुमारानुग्रहेणामरत्वाणनास्थापनं जांबवंतमितिब्रह्मसुतंहह्वजांबवंतंमैंदंद्विविदंतथोक्त्वाशा

रा.टी. ... ९५

रामायणतिलक

381) नैषोनेहत्यागकालं तं त्रेणाहर्पवेतिजोवक्ततामहयेयं च विभीषण हनूमतैमंदिद्विविदाश्च मरास्ते यूयं यावत्कलिश्चयलत्रूपो नाशः कवि

अ॰ युगं वनावत्कालेजीवथ तत्र सहनूमद्विभीषणयोः प्रलयेः तरेषां तु कलौ कृस्नावतारेणांशइतिवोध्यं १२ तदितिविभीषणादीन्प्रति

रा॰उ॰ एवमुक्त्वा इत्यत्रानुनिर्गमनानुज्ञामादेशयेः सर्वांस्तान्सर्वानेकपंक्त्यतिरिक्तात् १९ इतिरामायणोसर्गः १०८ अथमहाप्रस्थान

टी॰ विधिनाभगवतिनिर्गन्तेसर्वेषांतदनुगमनंप्रभातायामिति १ वाजपेयातपत्रेणैवधर्मार्थ्यानेसाधनत्वात्तराजचिह्नस्यसम्य

१९४ यावत्कलिस्तु संप्राप्तस्तावज्जीवत सर्वदा तदेवमुक्त्वा काकुत्स्थः सर्वांस्तान्वानरान्

उवाचवागच्छध्वं मया सार्धं यदोदितं १५ इत्यार्षे रामायणेऽष्टोत्तरशततमः सर्गः १०८ प्र

भातायां तु शर्वर्यां पृथुवक्षा महायशाः रामः कमलपत्राक्षः पुरोधसमथाब्रवीत् अ

ग्निहोत्रं व्रजत्वग्रे दीप्यमानं सहद्विजैः वाजपेयातपत्रं च शोभमानं महापथे ततो वसिष्ठस्ते

जस्वी सर्वं निरवशेषतः चकार विधिवद्धर्म्यं महाप्रास्थानिकं विधिं १ ततः सूक्ष्माम्बरधरो ब्रह्म

मावर्तयत्परं कुशान्गृहीत्वा पाणिभ्यां सरयूं प्रययावथ ५

क्तत्वादितिभावः २ महाप्रस्थानंनामपरलोकगमनायसंकल्पपूर्वकं प्रस्थानं तदर्हेतिमहाप्रस्थानिकंविधिमनुष्ठिप्ययोथमैः

कर्तव्यंस्तंधर्मैर्विधिवच्चकार १ ब्रह्ममावर्तयत्रिमत्कारोततमार्षपरब्रह्मेत्यर्थः प्रागगस्त्योपदिष्टंब्रह्मसिद्धान्तप्रथानम

हामंत्रमर्वसश्रीमद्रूलहृदयमावर्तयन्समयमनोवाग्भ्यामनुसंदधानइत्यर्थः इतिकनकब्रह्मप्रथानं ५ १९४

388 निपानकोपनिषद् आवर्तत्यर्थः इत्यनेकृणान् गरहीनार्थेशतिविवक्षया क्रान्ता नापश्ययोवस्यमाणलक्षणमहास्यानविधिनेतिमोऽका
सुखः ४ तदेवाहव्याहनितिनिश्चेष्टः किंचित्दार्थदर्शनश्रवणस्पर्शनादिविषयकेंद्रियचेष्टारहितः निःस्तवोः पथिपाडःकासवमणुशार्क
राकंटकादिदुःखदुःसहः ५ यमापमहस्मा श्रीर्लक्ष्मीः महेदेवीह्रा प्रतेलक्ष्मीश्रयत्ना वितिप्रोक्तो ह्रीमेंहोववसावोव्यवसायशक्तिः संहार
शक्तिः ६ तथासंहारशक्तिसहकारिणामपिमूर्तेतयोयासकलमाह पाशइति एवंमेदशक्तिसेवादर्शिता ७ अथहैरण्यगर्भशक्तिसेवा

गीताः सर्वधवाक्किनया ।।

आव्याहरत्वं किंचित्किंचिन्निश्चेष्टोनिःस्तवः पथि निर्जगाम महाहातस्मा ह्रीप्यमानोयथाश्रुमान ५
गमसदृशाणपार्श्वेपमाश्रीता.... सह्योपिचमहोदेवीव्यवसायस्तथाग्रतः ६ शरानाना
विधाश्चापिधनुस्सायतममनुत्तम तथायुधाश्चतेसर्वेययुः पुरुषविग्रहाः ७ वेदाब्राह्मणाश्च
गायत्रीसर्वदक्षिणी ॐकारोथवषट्कारः सर्वेराममनुव्रताः ८ ऋषयश्च महात्मानः
सर्वएवमहीसुराः अन्वगच्छ.....न्मानस्वर्गद्वारमपावृते ९ तंयान्तमनुगच्छंतिस्थंतःपुर

वराहेप्रि: मयमवानता

दर्शयतिवेदाइति गायत्रीसर्वदक्षिणी सर्ववेदतन्मूलयज्ञाधिकृताशेषजगद्रक्षिका तस्याअपिमूलं ॐकारोऽयनुगतः अनेनसर्वज्ञान
योगोदर्शितःवषट्कारः कर्मयोगः ८ स्वर्गद्वारमपावृतं परस्वर्गस्यब्रह्मलोकस्यद्वारमपावृतमनावृतं रामेणसहोपेंद्रलोकगम
नद्वारापमेणसहगतानांसर्वेषां जगत्तंनांब्रह्मलोकेस्येवप्रामेरितिवोध्यं अतएवेवक्ष्यति मायात्तंरामोरामास्पसयासितावब्रह्मलो
कंगामिष्यतिरामस्थितिलोकसेवब्रह्मलोकतावत् ९ वृषध्वराःवधाः १०

उ॰ 389 सांतःपुरः अंतःपुरस्त्रीसहितः गतिं सर्वलोकगतिं तं उपागम्य समीपमागत्यानुव्रतः पश्चाद्वलित इत्यर्थः ॥ महात्मानः ब्राह्मणाः १२
रा॰ प्रहृष्टवत् देहविसर्जने समीपावस्थानलाभजः प्रहर्षः पुष्टैस्तु नरवात्रुमिति १३ हृष्टं हृष्टानुगमनं तिस्वर्यं किलकिलाशब्दैरुप

टी॰ सांतःपुरश्चाभरतः शत्रुघ्नसहितो ययौ रामं गतिमुपागम्य साग्निहोत्रमुपाव्रतः ॥ ते च सर्वे म

१५५ हात्मानः साग्निहोत्राः समागताः सपुत्रदाराः काकुत्स्थमनुजग्मुर्महामतिं मंत्रिणो भृत्यवर्गाश्च
सपुत्रपशुबांधवाः सर्वे सहानुगा राममन्वगच्छन्प्रहृष्टवत् १३ ततः सर्वाः प्रकृतयो हृष्टपुष्टजना
वृताः ------गच्छंतिराघवं गुणरंजिताः १४ ततः सस्त्रीपुमांसस्ते सपक्षिपशुबांधवाः
राघवस्यानुगाः सर्वे हृष्टा विगतकल्मषाः १५ स्नाताः प्रमुदिताः सर्वे हृष्टपुष्टाश्च वानराः
दृष्टं किलकिलाशब्दैः सर्वं राममनुव्रताः न तत्र कश्चिद्दीनो वा व्रीडितो वापि दुःखिताः हृष्टं
समुदितं सर्वं बभूव परमाद्भुतं १७ द्रष्टुकामोऽथ निर्यांतं रामं जानपदो जनः यः प्राप्तः सोपि दृष्ट्वैव स्व
र्गायानुगतो जनः १८

लक्षितं सर्वं वानरबलमिति शेषः १६ दीनो दीनाकृतिः व्रीडितः गते रामे कथमहं तिष्ठामीति लज्जावशात् रामानुगमनं किंत्वसं॰
तोषेणैवेत्यर्थः समुदितं मिलितं सर्वं परमाद्भुतं परलोकरामनायैवं विपरहर्षयुक्तमिभ्यां स्वर्थकमभूदित्यर्थः १७ १८ १५५

390 अंतर्धानगतानि भूतप्रेतपिशाचादीनि भद्रकाल्यादीनि २० स्थावराणीति स्थावराणीनि स्थावराणामनंगमत्वं भगवतो रामस्य सदया
ब्रह्मलोकनेतदानीं ज्ञानक्रियाशक्त्युत्पादनमुपपद्यते २१ उच्छसन प्राणिनाचमिस्यर्थः सूक्ष्ममपि नदृश्यते अनुष्ठानामिति शेषः २२ कृत
कः १०८ इत्युत्तरकांडे नवाधिकशततमः सर्गः १०९ अथ रामेण स्वस्वरूपेण प्राप्य पश्चात्स्वर्गं जंतूनां पितामहानुमत्या ब्रह्मलो

ऋक्षवानररक्षांसि जनाश्च पुरवासिनः आगच्छत्वरया भक्त्या हृष्टाः सुसमाहिताः १९ यानि
भूतानि नगरेप्यंतर्धानगतानि च राघवं तान्यनुययुः स्वर्गाय समुपस्थिते २० यानि पश्यंति
काकुत्स्थं स्थावराणि चराणि च सर्वाणि रामगमने अनुजग्मुर्हि तान्यपि २१ नोच्छसत्तदयो
ध्यायां सूक्ष्ममपि हि दृश्यते तिर्यग्योनिगताश्चैव सर्वे राममनुव्रताः २२ इत्यार्षे सर्गः १०९
अथाध्यर्धयोजनं गत्वा नदीं पश्चान्मुखाश्रितां सरयूं पुण्यसलिलां ददर्श रघुनंदनः १ तामती
माकुलावर्तां सर्वत्रानुसरन्नृपः आगतः सप्रजो रामस्तं देशं रघुनंदनः अथ तस्मिन्मुहूर्ते
तु ब्रह्मा लोकपितामहः सर्वैः परिवृतो देवैर्भूषितैश्च महात्मभिः २

कादर्धाधीनेब्रह्मलोकसमेसंतानकलोकेप्रापणं अर्धे निम्नःअर्धाधिकं योजनं गत्वेत्यर्थः पश्चान्मुखेन स्वेनाश्रितां १ तं देशं स्वर्गप्रा
पकदेशं २ तस्मिन्मुहूर्ते लोकपितामहो ब्रह्मा ययौ इत्युत्तरेणान्वयः रामपरिकरस्य योवितलोकप्राप्यणार्थमिति शेषः ३

उ॰ रा॰ टी॰ १५८

391 स्वर्गाय स्वर्गं गंतुं ४ प्रथमतो दिव्यतेजसा व्याप्तं व्योम स्वयंप्रभैः स्वयमेव प्रकाशमानैस्तैरेव महत्प्रकाशमानैः स्वर्गिभिः स्वतेजोभिः कि
रणैरनुत्तममतिशयेन ज्योतिर्भूतं ज्योतिर्मयं सम्बभूवेत्यर्थः ५ महौघवत् महाप्रवाहवत् हिमवतीति शेषः ६ तूर्यशतैः संकीर्णे तस्मिन्का
ले इत्यर्थः गन्धर्वाप्सरसंकुले गन्धर्वाप्सरसां संकुलमिति यावत् पद्भ्यां समुपचक्रमे गन्तुमिति शेषः ७ अन्तरिक्षात्समीपमागत्या
भाषतेत्यर्थः हे विष्णो लोकानुग्रहाय मद्दत्तविष्णुशरीरवत्त्वं तत्र विदिष्ट्या प्राप्तोऽसि मायागृहीतनरः एवमयं नटयोग्यमनुष्य

प्राययौ यत्र काकुत्स्थः स्वर्गाय समुपस्थितः विमानशतकोटीभिर्दिव्याभिरभिसंवृतः दिव्यते
जोवृतं व्योम ज्योतिर्भूतमनुत्तमम् स्वयंतेजोभिः स्वर्गिभिः ...... शुभकर्मभिः ५ पुण्या वाता व
वुश्चैव गन्धवन्तः सुखप्रदाः पपात पुष्पवृष्टिश्च देवैर्मुक्ता महौघवत् ६ तस्मिंस्तूर्यशतैः की
र्णे गन्धर्वाप्सरसंकुले सरयूसलिलं रामः पद्भ्यां समुपचक्रमे ७ ततः पितामहो वाणीमन्तरि
क्षादभाषत आगच्छ विष्णो भद्रं ते दिष्ट्या प्राप्तोऽसि राघव ८ भ्रातृभिः सह देवाभैः प्रविशस्व स्व
कां तनुं यामिच्छसि महाबाहो तां तनुं प्रविश स्वकां ९

शरीरवत्त्वं तत्रापि विधिदिष्ट्या प्राप्तोऽसि मायागृहीतनरः एवमयं नटयोग्यमनुष्यशरीरविसर्जनकालं प्राप्तोऽसि ते भद्रमस्तु अग्रया
गच्छ यतो लोकान् मनुष्यलोकान् मनुष्यलोकं गतस्त्वं लोकं गतं स्वं लोकमित्यर्थः ८ तदर्थं च देवाभैः देवासमवसदृशैः भ्रा
तृभिः सह स्वकां तनुं तनुवदसंतप्रिये लोके प्रविश अत्र भ्रातृभिरिति बहुवचनेन लक्ष्मणस्यापि इदानीं तत्रागमनं सूच्यते तिस १५८
र्थः कां तनुं स्वं यद्यपि शत्रुघ्न एव सह गच्छति तथापि प्रागमनं तस्य सहगतस्य सहगच्छतः पश्चादागमिष्यति ९

392 यं स्वांतस्तत्प्रविशाः समाप्तेनाध्यनन प्रवेशस्तु व्यतेनविरोधः इति व्याख्येयो भरताग्रजमनं भगवन्नहं हविसर्जनदर्शनपर्यंतमि
ति च सर्वे संसर्गात् ततः शास्त्रसिद्धिनाधयाविति यथेच्छापनिस्तव तत्र भरतस्य पश्चाद्गमने मूलमत्वेष्टव्य प्रज्ञायां वहुवचनमित्यये
नतु मदीयतनूनामनेकत्वात्कं प्रविशाम्यहं तु व्यतेन आरय्यामिति ९ तेदेव विशदयतिवैस्नवीमितिहे महातेजः वैस्नवी स्वीयं दीयते
मत्तु मदेहस्तां वा प्रविशयद्वाकाशं सनातनं यद्वा सनातनमाकाशमद्वैव स्वरूपं वा प्रविशात्वह्येणावातिष्टेत्यर्थः आकाशशब्दोद्दिव
ह्मणि तत्र तत्र श्रुतिषु प्रसिद्धः कनकस्तु वैस्नवीं तां महातेजाः स्वां तनुं प्रविशास्व यमिति योजनाः पाठः यामिच्छसीति एतत्याक्तनम
धे व्याख्यामाधिकमित्याद्यग्रे च पितामह इव वदतीत्याह इति तात्पर्यवः तीर्थस्तु यद्वाकाशं सनातनमितित्याख्यायातः परं वस्त्वाप्नोति

वैस्नवीं तां महातेजो यद्वाकाशं सनातनं । त्वं हि लोकगतिर्देव न त्वां केचित्प्रजानते ॥ १०
ऋते मायां विशालाक्षीं तव पूर्वपरिग्रहां । त्वामचिंत्यं महद्भूतमक्षयं चाजरं तथा ॥ ११ यामि
च्छसि महातेजास्तां तनुं प्रविश स्वयम् ॥ १२

त्वं हीति लोकगतिः लोकानां स्वर्गादिकं गमयितालोकैर्गम्यश्च तमेव त्यर्थः त्वां केचिदिति शयितनत्पः सेयमामपि न प्रजानते
१० ते हिं किमस्य सेयं एवमस्वेत्याने त्याह ऋतेइति मायां ज्ञानशक्ति रूपां विना त्वां न जानंतीत्यर्थः वीलाक्षीमित्यनेनतस्या सर्वे
विषयतास्त्वं चितापूर्वपरिग्रहां तेन सहजत्वं सूचितं श्रवणमनन निदिध्यासनादिना सहशेषज्ञानशक्तिर्येषां प्रादुर्भवति तएव त्वां
जानंतीतित्यर्थः तत्र हृदयाज्ञानविषयेस्वरूपमाहत्वामिति अचिंत्यदेशतः परिच्छेदशून्यत्वं अतएव महद्भूतं त्वामक्षयं अविशेषात
मदेवस्तुभिरितिशेषः तेन वस्तुपरिच्छेदशून्यत्वं अक्षयं जरं न विकालपरिच्छेदशून्यत्वं अजरं रीणा एवं स्वतनाप्रकृतिविज्ञाप्यं तियामिति ॥ ११

उ॰ 393 अथ यस्मा लोकं कादित्योजनानसंतानापरपर्यायं स्वलोकं प्रापय्य क्रमेण परमं पदं नेतुकामो दयालुर्भगवान् स्वतोप्यनुत्तमं लो

रा॰ कं प्रापितवानिति तत्राबाधोऽक्षेत्रं लोकमेव गच्छति सोन्याह पितामहेति महामतिः सर्वज्ञो भगवान् विनिश्चित्य प्राप्तुकं निश्चयं कृ

टी॰ त्वा सशरीरो वैष्णवं तेजः यत्तत्वालावतेजोमयमोपेंद्रं विवेश अनेन तेजोमयपयपवदेहासाध्यामनुष्यदेवादिभिर्मनुष्यदेह

१९२ त्वेन स्वद्दीतस्त निश्चितितेनोतः प्रवेशो जले जलवह्निविवेकेनाग्रहात्तुहृब्रह्मणेनानुजशब्दो वो विधितस्त समदचर्येण तेजोमयं

पितामहवचः श्रुत्वा विनिश्चित्य महामतिः विवेश वैष्णवं तेजः सशरीरः सहानुजः १२ त

तो विष्णुमयं देवं पूजयंति स्म देवताः साध्या मरुद्गणाश्चैव सेंद्राः साग्निपुरोगमाः १३

ये च दिव्या ऋषिगणा गंधर्वाप्सरसश्च याः सुपर्णनागयक्षाश्च दैत्यदानवराक्षसाः १४

सर्वं हृष्टं प्रमुदितं सुसंपूर्णमनोरथं साधु साध्विति तैर्देवैस्त्रिदिवं गतकल्मषम् १५

स्वीकृतशरीरेणानुजेनोपचितस्य सहचर्येण तेषामपि सशरीरोपानात् १२ ततः प्रवेशानंतरं विष्णुमयं पूर्वं रामाभेदमापन्नं देवं देवताः

पूजयंति स्म काः स्ता देवतास्तत्राह साध्या इत्यादि १३ सर्वमिति यत्रागते पूर्वमिदं त्रिदिवस्था जनजातं हृष्टं प्रमुदितं १५०

सुदितं सुसंपूर्णमनोरथं गतकल्मषं च जातमासीदिति तैर्देवैः साधु साध्विति भाषितं १४ १५

394 अथ विभुः विभुशरीरसंज्ञो नश्वरी रामस्तेजोरामः पितामहमुवाच ह १६ किमुवाच तदाह एषां लोकमिति ब्रह्मलोकमभिहारा
प्रति संवरेत्वया सह मोदयसि पर्कं लोकं एषां पादात् महर्हसि किमर्थमेवमेतन्मत्क्रयेयतस्ते चाह इमेहीतियतो पतिमेत्वेहादेनेमानुया
तानुगमनं श्रमः ७ भक्ताः अतएवमेव भजनीया महात्मेमहिंयोगामहितस्त्वया एमात् समक्षं शरीराश्च तपवन्नाहयशालोकदानश्च
वितमितिभावः भक्ताहि भाषितत्वामे निपादेयतश्मेभाषितव्याः पतत्प्रयोजनार्थं भवन्तं प्रति अवरूपमयावक्तव्यास्त्यर्थं लोकगु

अथ विभुर्महातेजाः पितामहमुवाच ह एषां लोकं जनौघानां दातुमर्हसि सुव्रत १६ इमे
हि सर्वे स्नेहात्मामनुयाताः तपस्विनः भक्ताहि भजितव्याश्च त्यक्तात्मानश्च मत्कृते १७
तच्छ्रुत्वा विष्णुवचनं ब्रह्मलोकगुरुः प्रभुः लोकान्सन्तानकान्नाम यास्यन्तीमे समागताः १८
यच्च तिर्यग्गतं किंचिन्मामेवमनुचिंतयन् प्राणांस्त्यक्षति भक्त्या वै संतानेषु निवत्स्यति १९

रुः सर्वजगत्कर्तावेदादिसर्वविद्योपदेष्टा च प्रभुः नित्यनैमित्तिकविहितविषिद्धकर्मणां फलप्रापणे समर्थः इमे त्वया सह समा
गतां संतानकानाम लोकान्क्रमेण ब्रह्मलोकमपि यद्धारा भक्तिजनकान्यास्यंति १८ ननु कथं ब्रह्मविज्ञस्यो ब्रह्मलोको वानरप्र
भृतं श्रादय चेति तिर्यग्गतमपि यत् किंचित् यज्ञक्त्वापि यदार्थं तामेव विष्णुमिति चिंतयत् यत्किंचित्सदा पूर्वविस्मयेन भावयन्त्यार्थिव
लोभतया पुरुषैस्त्यक्ष्यति तत्संता तेनामकलोकेषु वत्स्यति किं पुनर्वक्तव्यं यएवं तवदनुरागेणानुगमनं सर्वं प्राणांस्त्यजंति ते संतानेषु

कौसौसंतालोकमत्राहसर्वैरितिसर्वैर्गुणैः सत्यसंकल्पत्वादिब्रह्मगुणैर्युक्ते ब्रह्मलोकादनंतरे तत्समीपत्वेअनेन तत्रस्थिता
नामपिक्रमेण ब्रह्मलोकप्राप्तिर्ब्रह्मणासहमुक्तिः सूचिताः २० एवं सामान्यतो वानराणां सांतानिकलोकप्राप्तिमुक्त्वा पुण्यदेवा
ंशानां सुग्रीवादीनां ततद्देवादिस्वरूपप्राप्तिमाह वानराश्चेति वानराः सुग्रीवादयः ऋक्षाः जांबवदितिरिक्ताः स्वकां स्वीयां योनिं
देवेशानिसस्वरूपं ययुः उक्तमेवार्थंस्पष्टयति येभ्यइति सुरेभ्यस्तत्र यत्तत्त्वं येभ्योदेवर्षादिभ्यो ये विनिःसृताः सुरसंभवाः स

सर्वैर्ब्रह्मगुणोर्युक्तं ब्रह्मलोकादनंतरे २० वानराश्चस्वकां योनिमृक्षाश्चैव तथा ययुः ये
भ्यो विनिःसृताः सर्वेसुरेभ्यः सुरसंभवाः २१ तेषु प्रविविशे चैव सुग्रीवः सूर्यमंडलं पश्यतां
सर्वदेवानां स्वान्पितॄन्प्रतिपेदिरे २२ तथाब्रुवति देवेशे गोप्रतारमुपागताः भेजिरे सरयूं स
र्वे हर्षपूर्णाश्रुविक्लवाः २३

पितॄन्प्रतिपेदिरे तेषु मध्ये सुग्रीवः सूर्यमंडलं प्रविविशे अत्र ययुः प्रतिपेदिरे इति निर्देशो भविष्यदर्थे अवतीर्यसमीकृत्यसर्वा
र्थान्स्वीकुर्वते इत्यनेनैवेति ज्ञापनार्थं २२ उक्तार्थमुपसंहरति तथेति देवेशे पितामहे तथोक्तवति अयागच्छत प्रविशत स्वकानेव
मित्यर्थः वति तेयः गोप्रतारं गोप्रतारसंज्ञकतीर्थं सरयूमुपागताः संतः सर्वे हर्षपूर्णाश्रुविक्लवाः आनंदजाश्रुपूर्णां तथा विक्ल

396 शुष्ययोयः प्राणीतदासरयूजलमवग्रहस्पृष्टवह्नृष्टवह्नृष्टप्रासीत्समात्रेषुदेहमुत्सृज्यविमानमध्यरोहत २४ तिर्यग्योनिगतानांना
तानित्रनेकानिसरयूजलेनदवगाहंप्राप्यप्रभास्वराणिवपूंषिजलंतदवगाह्यप्राप्यप्रभास्वराणिवपूंषियेषांताहृशानिभूत्वात्रिदिवंज
ग्मुः २५ दिव्यादिव्यवपुषःसंतोदिव्येनवपुषादीप्तादेवाइवाभवत् २५ प्रथम्स्थावराणिचपप्रपादीनिसरयूतोयंगत्वाततोयविक्ले

प्रवगास्याशुयेवैराणांणांसत्ककाप्रहृष्टवत् सानुषंदेहमुत्सृज्यविमानंसोऽध्यरोहतं २४
तिर्यग्योनिगतानांवशतानिसरयूजलं संप्राप्यत्रिदिवंजग्मुः प्रभास्वरवपुर्षितः २५
दिव्यादिव्येनवपुषादेवादीप्तास्वाभवन् २५ गत्वात्तुसरयूतोयंस्थावराणिचसर्वाणि
च प्राप्यततोयविक्लेदंदेवलोकमुपागमन् तस्मिन्नपिसमापन्नाऋक्षवानरराक्ष
सा तेपिस्वर्गेप्रविविशुर्देहान्निक्षिप्यचांभसि २७

दंप्राप्य ततोवमज्जनंप्राप्यदेवलोकमुपागमन्कल्पपत्तकामगत्वादिसुरूपंप्राप्नुवंतीत्यर्थः २६ तस्मिन्सरयूजलेसमापन्ना
स्पक्षदेहास्तेपिसर्वेपतान्देहान्अंभसिनिक्षिप्यस्वर्गंसंतानलोकरूपंविविशुः २७

ॐ. रा.उ. टी. १५५

397 ततः समागताः न दिवौकसः इतिरिक्तेस्वसीयं प्राप्तान् दि वितत उचित स्वर्गे स्थापयित्वा स्वयं भगवदागमनाहृष्टैर्देवैः सह त्रिदिवं स्वलोकं
जगाम २८ कतकः १०९ इति श्रीरामायणोत्तरपाठिकशानमः १०९ अथ तत्काव्यफलोपदेशः एतावदेतादिति लोनंडकृ रकाउप
हितं ब्रह्मणा वक्तृमेवेन भगवद्वतारचरितविषयत्वात् पूजितं किं च ब्रह्मभिर्ब्रह्मर्षिभिः पूजितं ब्रह्मणा स्वयं प्रवर्तितं वाल्मीकिनाका
रितत्वात् सर्वाख्यानेभ्यः प्रशस्तं रामायणमिति ख्यातं वा चरितविषयत्वात् पूजितं किं च ब्रह्मभिर्ब्रह्मर्षिभिः वाल्मीकिना कृतं म

ततः समागतान् सर्वान् स्थाप्य लोकगुरुर्दिवि हृष्टैः प्रमुदितैर्देवैर्जगाम त्रिदिवं महत् २८
इत्यार्षे रामायणे सर्गः १०९ एतावदेतदाख्यानं सोत्तरं ब्रह्मपूजितं रामायणमिति ख्यातं
मुख्यं वाल्मीकिना कृतं १ ततः प्रतिष्ठितो विष्णुः स्वर्गलोके यथापुरा येन व्याप्तमिदं सर्वं
त्रैलोक्यं सचराचरम् २

महाख्यानमेतावदेव एतावत् श्लोकसर्गकाण्डसंख्याकमेव न न्यूनं नाधिकमित्यर्थः १ अथ पूर्वं सर्गद्वन्द्वेनानुवादः पूर्वककाव्यास्य
पवर्गीत साथ कथनेन श्लोकद्वयार्थत्व प्रतिपादनं तत्र इति ततो भक्तजनस्य स्वर्गप्रापणानन्तरं स्वयमपि विष्णुरूपेणैव प्राप्तः स्वर्गलो
के यथापुरा यथा पूर्वं प्रतिष्ठितः एवं तर्हि स परिच्छेदः किं स नेत्याह येनेति सचराचरं सर्वं त्रैलोक्यं जगदुपादानत्वेन व्याप्तं स्व १५५
र्गे प्रतिष्ठितत्वं तु मनुष्यदेहस्थापरित्यागमिव मायिकमिति भावः २

ॐ॰ 398 ततः परमयोध्याकेन रूपेणास्थितेत्यतिशंकां निह्नते तति शंकातिहस्ये भविष्यदहं तांतरमास्तायोध्यापीति रम्या अयोध्या पूर्ययि विवहून्वर्षगणान्
मूर्त्यासती कालांतरे ऋषभराजानमवाप्य निवासं जनाश्रमत्वमुपयास्यति अत्र कतकः एवं चायोध्याविषयेभिषिक्तेन भरतेनायो
रा॰उ॰ ध्यादेशान्ते दिग्रामे स्थित्वा तेव वर्धितन रतिरिष्टमित्रिमाननविंसंमतेनवक्ष्ये राजन्वीतेलाभोनत्वेव हिनकामयेयथाराज्यंतां विनारघुन
टी॰ दनेति पूर्वमरतोनयाविरुद्धवत तस्यापिपाउद्यस्तेयादीराउभेरा चवस्थानुगममनेनिश्चितार्था: तमाश्रय: राघवमक्तचतवीज्ञरभूतसक
१०

अयोध्यापि पुरी रम्या मूर्त्या न्वर्षगणान्बहून् ऋषभं प्राप्य राजानं निवासमुपयास्यति ९ ए
तदाख्यानमायुष्यं ------ सहोत्तरं कृतवान्प्रचेतसः पुत्रस्तद्ब्रह्माप्यन्वमन्यत १० हरिः ॐ
इत्यार्षे रामायणे वाल्मीकीये उत्तरकांडे स्वर्गारोहणं नामैकादशोत्तरशततमः सर्गः ॥१११

राज्ञया: भो भार तराउन्नाणां रवेवं जातवभूवत्वतीति पापविरुद्धं चेत्यर्थ: ९ एतदिति भवद्या तं तं तरंभगवद योध्याहृतांतं कृतनथ नसहि
तेमदोत्तरं एतावदे नाख्यानमित्यर्थ: ब्राह्मेनोत्तरकांडसहितं प्रचेतस: पुत्रो वाल्मीकि: एतद्रामायणाख्यानं कृतवान् प्रचेतस:
पुत्रस्तु सत्याधिक्यमार्षत्वात् तद्ब्रह्मादिरप्यगभीरत्वमन्यतसत्यप्रकृतयावेदोपवृंहणतयासर्वार्थसाधकतयाचांगीकृतवा
निति सर्वेष्टसिद्धि: १० इत्यार्षे रामायणे उत्तरकांडे सर्गः १११ संवत् ।११ ९ ग्रन्थश्रुति वित्रियोदर्शप्राशनचरखावायां । १०

399 ततः अस्य काव्यस्य जगदुपादानकारणरघुचरित्राख्यानानंतरः देवादयोपि दिव्यं रामायणं दिवि स्म शृण्वंति १ यत एवमत इदमाख्यान
मायुष्यमितिश्लोकं पठितं परिनिष्ठितं वत्सदायुर्जनकमित्यर्थः सौभाग्यं सौभाग्यवर्द्धनं वेदसमं वेदवत्तत्त्वविषयत्वेपि सौ श्रेयस्करं नवेदनः किंचि

ततो देवाः सगंधर्वाः सिद्धाश्च परमर्षयः नित्यं शृण्वंति संहृष्टाः काव्यं रामायणं दिवि
इदमाख्यानमायुष्यं सौभाग्यं पापनाशनं रामायणं वेदसमं श्राद्धेषु श्रावयेद्बुधः ४ अ
पुत्रो लभते पुत्रमधनो लभते धनं सर्वपापैः प्रमुच्येत पादमप्यस्य यः पठेत् ५ पापान्यपि च
यः कुर्यादहन्यहनि मानवः पठत्येकमपि श्लोकं पापात्स परिमुच्यते ६ वाचकाय च दा
तव्यं वस्त्रं धेनुर्हिरण्यकं वाचके परितुष्टे तु तुष्टाः स्युः सर्वदेवताः ७ एतदाख्यानमायु
ष्यं पठन्रामायणं नरः सपुत्रपौत्रो लोकेस्मिन्प्रेत्य चेह महीयते ८

धनमित्यर्थः ४ ५ ६ ७ लोकेस्मिन्महीयते इत्यर्थः प्रेत्य मरणोत्तरं परस्मिन्नेव चामुत्र इहलोके च महीयते इहलोके प्रजाचकी
र्त्यविच्छेदात् ८

अथरामायणविधिर्लिख्यते रामायणस्यकृतेदद्याद्रथंहेममयंसुधीः चतुर्भिर्वाजिभिर्युक्तंतथाद्दो
पमतांकथां १ रत्नैश्चविविधैर्युक्तंकिंकिणीनादनादितं संपादितेरथेसम्यक्कथेत्तुर्दद्यात्स्वयंस्विनी
ब्राह्मणान्भोजयेत्सम्यग्यातयानमष्टोत्तरंसुधीः २ एवंकृतविधानेनमहाकाम्यफलप्रदं रामायणंभ
वेत्तनेनात्रकार्याविचारणा ३ इतिरामायणविधानं श्रुत्वारामायणंपुण्यंदद्याद्वासांसिदक्षिणां
सुवर्णंयेनसंयुक्तंवासांसिविविधानिच १ कर्णयोःकुंडलेदद्यादंगुलीयकमेवच पाद्यासनंतथा
छत्रंसुपानत्कारकंतथा २ भूमिदानंतथावस्त्रदानंताम्बूलमेवच भक्ष्यंभोज्यंचविविधंलेह्यंचोष्यंस
हदिति १ अश्वमेधसहस्रस्यवाजपेयशतस्यच लभतेश्रवणाद्देवाध्यायस्यैकस्यमानवः ४ प्रयागा
दीनितीर्थानिगंगाद्याःसरितस्तथा नैमिषादीन्यरण्यानिकुरुक्षेत्रादिकान्यपि ५ कृतान्कृतानितेनलोके
स्मिन्येनरामायणंश्रुतं हेमहाबलरुद्रेश्रेष्ठलभानोप्रयच्छति ६ यश्चरामायणंलोकेशृणोतिसमपर्वसः
सम्यक्श्रद्धासमायुक्तोलभतेराघवीकथां ७ सर्वपापात्प्रमुच्येतविष्णुलोकंसगच्छति आदिकाव्य
मिदंसर्वंपुरावाल्मीकिनाकृतं ८ यःशृणोतिसदाभक्त्यासगच्छेत्स्वर्गतिं पुत्रदाराश्चवर्द्धंतेसंप
दोसंततिस्तथा ९ सत्यमेतद्धिदितान्श्रोतव्यंनियतात्मभिः १० इतिरामायणश्रवणविधिः ॥

उत्तरकांड

पत्र २०१ ॥